ॐ ऐं ह्रीं श्रीं ऐं क्लीं सौः ओं पं फं बं भं मं औं कनिष्ठिकाभ्यां नमः नेत्रत्रयाय वौषट् । ॐ ऐं ह्रीं श्रीं ऐं क्लीं सौः अं यं रं लं वं शं षं सं हं ळं क्षं अः करतलकरपृष्ठाभ्यां नम, अस्त्राय फट् । एवं करषङ्गन्यासौ कृत्वा ध्यायेत् ।

आधारे लिंगनाभौ प्रकटितहृदये तालुमूले ललाटे
द्वे पत्रे षोडशारे द्विदशदशदले द्वादशार्थे चतुष्के ।
वासान्ते बालमध्ये डफकठसहिते कण्ठदेशे स्वराणां
हंक्षं तत्त्वार्थयुक्तं सकलदलगतां वर्णरूपां नमामि ॥

इति ध्यात्वा ।

ॐ ऐं ह्रीं श्रीं ऐं क्लीं सौः अं नमः, आं नमः इं...अः नमः इति कण्ठमध्ये षोडशदले । ॐ ६ कं खं...ठ इति द्वादशवर्णान् हृदये द्वादशदले ।

ॐ ६ डं ढं...फं इति दशवर्णान् नाभौ द्वादशदल ।

ॐ ६ बं भं...लं इति षड्वर्णान् गुह्ये षट्दले ।

ॐ ६ वं शं षं सं इति चतुरो वर्णान् आधारे चतुर्दले ।

ॐ ६ हं क्षं इति द्वौ वर्णौ भ्रूमध्ये द्विदले न्यसेत् ।

इति अन्तर्मातृकान्यासः ।

## अथ बहिर्मातृकान्यासः ।

तत्र मातृकाध्यानम् ।

पञ्चाशद्वर्णभेदैर्विहितवदनदोःपादहृत्कुक्षिवक्षो—
देशां भास्वत्कपर्दिकलितशशिकलामिन्दुकुन्दावदातम् ।
अक्षस्रक्पूर्णकुम्भां लिखितवरकरां त्रीक्षणामब्जसंस्था
मच्छाकल्पामतुच्छस्तनजघनभरां भारतीं तां नमामि ॥

इति ध्यात्वा पञ्चपूजां कृत्वा सर्वाङ्गेषु न्यसेत् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ॐ ऐं ह्रीं श्रीं ऐं क्लीं सौः अं नमः शिरसि ।

ॐ ६ आं नमः मुखे ।

ॐ ६ इं नमः दक्षनेत्रे ।

ॐ ६ ईं नमः वामनेत्रे ।

ॐ ६ उं नमः दक्षकर्णे ।

ॐ ६ ऊं नमः वामकर्णे ।

ॐ ६ ऋं नमः दक्षनासापुटे ।

ॐ ६ ॠं नमः वामनासापुटे ।

ॐ ६ ऌं नमः दक्षगण्डे ।

ॐ ६ ॡं नमः वामगण्डे ।

ॐ ६ एं नमः ऊर्ध्वोष्ठे ।

ॐ ६ ऐं नमः अधरोष्ठे ।

ॐ ६ ओं नमः ऊर्ध्वदंतपंक्तौ ।

ॐ ६ औं नमः अधोदन्तपंक्तौ ।

ॐ ६ अं नमः मुखवृत्ते ।

ॐ ६ अः नमः कण्ठे ।

ॐ ६ कं नमः दक्षवाहुमूले ।

ॐ ६ खं नमः दक्षवाहुकूर्परे ।

ॐ ६ गं नमः दक्षमणिवन्धे ।

ॐ ६ घं नमः दक्षाङ्गुलिमूले ।

ॐ ६ ङं नमः दक्षाङ्गुल्यग्रे ।

ॐ ६ चं नमः वामवाहुमूले ।

ॐ ६ छं नमः वामकूर्परे ।

ॐ जं नमः वाममणिवन्धे ।

ॐ झं नमः वामाङ्गुलिमूले ।

ॐ ६ ञं नमः वामाङ्गुल्यग्रे ।

ॐ ६ ट नमः दक्षपादमूले ।

ॐ ६ ठं नमः दक्षजानुनि ।

ॐ ६ डं नमः दक्षगुल्फे ।

ॐ ६ ढं नमः दक्षपादाङ्गुलिमूले ।

ॐ ६ णं नमः दक्षपादाङ्गुल्यग्रे ।

ॐ ६ त नमः वामपादमूले ।

ॐ ६ थं नमः वामजानुनि ।

ॐ ६ दं नमः वामगुल्फे ।

ॐ ६ धं नमः वामपादाङ्गुलिमूले

ॐ ६ नं नमः वामपादाङ्गुल्यग्रे ।

ॐ ६ पं नमः दक्षपार्श्वे ।

ॐ ६ फं नमः वामपार्श्वे ।

ॐ ६ बं नमः पृष्ठे ।

ॐ ६ भं नमः नाभौ ।

ॐ ६ मं नमः जठरे ।

ॐ ६ यं नमः हृदये ।

ॐ ६ रं नमः दक्षांशे ।

ॐ ६ लं नमः ककुदि ।

ॐ ६ वं नमः वामांशे ।

ॐ ६ शं नमः हृदयादिदक्षकरान्तम् ।

ॐ ६ षं नमः हृदयादिवामकरान्तम् ।

ॐ ६ सं नमः हृदयादिदक्षपादान्तम् ।

ॐ ६ हं नमः हृदयादिवामपादान्तम् ।

ॐ ६ ळं नमः मस्तकादिपादान्तम् ।

ॐ ६ क्षं नमः पादादिशिरोन्तम् ।

For Private and Personal Use Only

## अथ करशुद्धिन्यासः ।

ॐ ऐं ह्रीं श्रीं अं मध्यमाभ्यां नमः ।
" आं अनामिकाभ्यां नमः ।
" सौः कनिष्ठिकाभ्यां नमः ।
" अं अंगुष्ठाभ्यां नमः ।
" आं तर्जनीभ्यां नमः ।
" सौः करतलकरपृष्ठाभ्यां नमः ।

## आत्मरक्षान्यासः ।

ॐ ऐं ह्रीं श्रीं ऐं क्लीं सौः श्रीमहात्रिपुरसुन्दरि आत्मानं रक्ष रक्ष इति हृदयेऽञ्जलिं दद्यात् ।

## चतुरासनन्यासः ।

ॐ ऐं ह्रीं श्रीं ह्रीं क्लीं सौः देव्यासनाय नमः । इति मूलाधारे न्यसेत् ।
" ह्रैं ह्क्लीं ह्सौः श्रीचक्रासनाय नमः ।
" ह्सैः ह्स्क्ली ह्स्सौः सर्वमन्त्रासनाय नमः ।
" ह्रीं क्लीं ब्लें साध्यसिद्धासनाय नमः ।

—इति त्रिभिर्मन्त्रैर्मुहुर्मुहु पुष्पक्षेपेण देवतासनानि श्रीचक्रे न्यसेत् ।

## अथ बालाषड्गन्यासः ॥

ॐ ऐं ह्रीं श्रीं ऐं हृदयाय नमः ।
ऐं ह्रीं श्रीं क्लीं शिरसे स्वाहा ।
" सौः शिखायै वषट् ।
" ऐं कवचाय हुम् ।
" क्लीं नेत्रत्रयाय वौषट् ।
" सौः अस्त्राय फट् ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## अथ वाग्देवतान्यासः ॥

ॐ ऐं ह्रीं श्रीं अं आं इं ईं उं ऊं ऋं ॠं लृं लॄं एं ऐं ओं औं अं अः

ब्लूं वशिनीवाग्देवतायै नमः शिरसि ।

ऐं ह्रीं श्रीं कं खं गं घं ङं कॢल्ह्रीं कामेश्वरीवाग्देवतायै नमः, ललाटे ।

" चं छं जं झं ञं न्व्लीं मोदिनीवाग्देवतायै नमः भ्रूमध्ये ।

" टं ठं डं ढं णं य्लूं विमलावाग्देवतायै नमः कण्ठे ।

" तं थं दं धं नं ज्म्रीं अरुणावाग्देवतायै नमः हृदये ।

" पं फं बं भं मं ह् स् ल् व् यूं जयिनीवाग्देवतायै नमः नाभौ ।

" यं रं लं वं झं म् र् यूं सर्वेश्वरीवाग्देवतायै नमः लिंगे ।

" शं षं सं हं लं क्षं क्ष्म्रीं कौलिनीवाग्देवतायै नमः मूलाधारे ।

ॐ ऐं ह्रीं श्रीं कं नमः शिरसि । ॐ ऐं ह्रीं श्रीं हं नमः मुखे ।

| | |
|---|---|
| " ऐं नमः मूलाधारे । | " लं नमः दक्षभुजे । |
| " ईं नमः हृदि । | " ह्रीं नमः वामभुजे । |
| " लं नमः दक्षनेत्रे । | " सं नमः पृष्ठे । |
| " ह्रीं नमः वामनेत्रे । | " कं नमः दक्षजानौ । |
| " हं नमः भ्रूमध्ये । | " लं नमः वामजानौ । |
| " सं नमः दक्षश्रोत्रे । | " ह्रीं नमः नाभौ । |
| " कं नमः वामश्रोत्रे । | इति वर्णन्यास । |

बालार्कमण्डलाभासां चतुर्बाहुं त्रिलोचनाम् ।
पाशाङ्कुशधनुर्बाणान् धारयन्तीं शिवां भजे ॥

इति ध्यानोक्तां श्रीमहात्रिपुरसुन्दरीं स्वहृदि ध्यात्वा मानसोपचारैः सम्पूज्य किंचिनमूलं प्रजप्य योनिमुद्रया प्रणमेत् ।–इति न्यासविधिः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## अथ पात्रासादनम्[१४] ॥

### तत्रादौ सामान्यार्घ्यस्थापनम् ।

स्वस्य द्वादशाङ्गुलप्रदेशात् पुरतो भुवि स्वस्य वामतो देव्याः

१४ અત્યાર સુધીની ક્રિયાને અંતર્યાગ કહે છે. તેમાં શરીરની અંદર જ ઇષ્ટ દેવતાનું ભાવનાત્મક સ્થાપન-પૂજન-અર્ચન-આરાધન કરવામાં આવે છે. આ ક્રિયા જેઓ વિવિધ સામગ્રીથી પૂજન ન કરી શકતા હોય તેવાઓ માટે ઉપયોગી છે. પરંતુ જેઓ વિવિધ સામગ્રીથી ઇષ્ટ દેવનું પૂજન કરી શકતા હોય તેઓને માટે અંતર્યાગ ઉપરાંત બહિર્યાગ એટલે મૂર્તિ કે યંત્ર આદિમાં દેવની વિવિધ પ્રકારથી પૂજા કરવાનો વિધિ છે. બહિર્યાગનો આરંભ પાત્રાસાદનથી થાય છે. આ પાત્રોમાં કલશ, સામાન્યાર્ઘ્ય અને વિશેષાર્ઘ્ય મુખ્ય છે. કલશને વર્ધનીપાત્ર કહે છે અને સામાન્યાર્ઘ્ય પાત્રને શંખ એમ કહે છે. વર્ધની એટલે કલશને સંસ્કારિત કરી તેમાં સંસ્કારિત જલ ભરવામાં આવે છે. આને સામાન્ય રીતે કલશ એમ કહેવાનો રિવાજ છે. શ્રીવિદ્યાના ઉપાસકો તેને માટે વર્ધની શબ્દ વાપરે છે. સામાન્ય અર્ઘ્યમાં પણ મંત્રથી સંસ્કારિત જલ ભરવામાં આવે છે અને વિશેષાર્ઘ્યમાં કેટલાક વધારાના સંસ્કારોથી યુક્ત જલ અને કેટલાક વિહિત પદાર્થો નાખવામાં આવે છે. મુખ્ય દેવતાને પદાર્થો અર્પણ કરતાં જે જળનો ઉપયોગ કરવો પડે છે તે જળ વિશેષાર્ઘ્ય પાત્રમાંથી લેવામાં આવે છે અને પરિવાર દેવતાઓને દ્રવ્ય સમર્પણની ક્રિયામાં સામાન્ય અર્ઘ્યના પાત્રના જળનો ઉપયોગ થાય છે.

સાધક (પૂજક)ની યોગ્યતા પ્રમાણે ત્રણથી લઇ તેર જેટલાં પાત્રોનું સ્થાપન કરવામાં આવે છે. આ બધામાં યોગ્યતા મુખ્ય વસ્તુ છે. શ્રીવિદ્યોપાસકો આ ત્રણ પાત્રો ઉપરાંત આત્મપાત્ર અને ગુરુપાત્ર એમ બે વધારે લે છે.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पुरतो वर्धिनी पात्रस्थिनेनाम्भसा बिन्दु-त्रिकोण-षट्कोण-वृत्त-चतुरस्रात्मकं मण्डलं मत्स्यमुद्रया निर्माय चतुरस्रस्य अग्नीशनैर्ऋत्यवायु कोणेषु मध्ये पूर्वादिदिक्षु च क्रमेण—

| | |
|---|---|
| ३ ऐं हृदयाय नमः । | ३ ऐं कवचाय हुम् । |
| ३ क्लीं शिरसे स्वाहा । | ३ क्लीं नेत्रत्रयाय वौषट् । |
| ३ सौः शिखायै वषट् । | ३ सौः अस्त्राय फट् । |

( अत्र ३ = ऐं ह्रीं श्रीं ज्ञेयम् )

इति पुष्पै षडङ्गमभ्यर्चयेत् । तत अस्त्राय फडिति क्षालितमाधारं ऐं ह्रीं श्रीं अं दशकलात्मने वह्निमण्डलाय सामान्यार्घ्य-पात्राधाराय नमः । इति निधाय अग्निमण्डलत्वेन विभाविते तस्मिन् स्वाग्रादि प्रादक्षिण्येन—

| | |
|---|---|
| ३ यं धूम्रार्चिषे नमः । | ३ षं सुश्रियै नमः । |
| ३ रं ऊष्मायै नमः । | ३ सं सुरूपायै नमः । |
| ३ लं ज्वलिन्यै नमः । | ३ हं कपिलायै नमः । |
| ३ वं ज्वालिन्यै नमः । | ३ ळं हव्यवाहायै नमः । |
| ३ शं विस्फुलिंगिन्यै नमः । | ३ क्षं कव्यवाहायै नमः । |

इति दशवह्निकलाः सम्पूज्य आधारोपरि अस्त्रक्षालितं शंखं ॐ ऐं ह्रीं श्रीं द्वादशकलात्मने सूर्यमण्डलाय सामान्यार्घ्यपात्राय नमः । इति संस्थाप्य सूर्यमण्डलात्मकतया ध्यातस्य पूर्वोक्तक्रमेण

| | |
|---|---|
| ३ कं भं तपिन्यै नमः । | ३ छं दं सुषुम्णायै नमः । |
| ३ खं बं तापिन्यै „ । | ३ जं थं भोगदायै „ । |
| ३ गं फं धूम्रायै „ । | ३ झं तं विश्वायै „ । |
| ३ घं पं मरीच्यै „ । | ३ ञं णं बोधिन्यै „ । |
| ३ ङं नं ज्वालिन्यै „ । | ३ टं ढं धारिण्यै „ । |
| ३ चं धं रुच्यै „ । | ३ ठं डं क्षमायै „ । |

इति द्वादश सूर्यकलाः सम्पूज्य तस्मिन् शंखे—

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ऐं ह्रीं श्रीं षोडश कलात्मने सं सोममण्डलाय सामान्यार्घ्य पात्रामृताय नमः । इति कर्पूरादिवासितं वर्धनीजलमापूर्य क्षीर-विन्दु दत्त्वा सोममण्डलत्वेन विभाविते तस्मिन् जले पूर्वोक्तक्रमेण—

| | |
|---|---|
| ३ अं अमृतायै नमः । | ३ लृं चन्द्रिकायै नमः । |
| ३ आं मानदायै ,, । | ३ लॄं कान्त्यै ,, । |
| ३ इं पूषायै ,, । | ३ एं ज्योत्स्नायै ,, । |
| ३ ईं तुष्टयै ,, । | ३ ऐं श्रियै ,, । |
| ३ उं पुष्टयै ,, । | ३ ओं प्रीत्यै ,, । |
| ३ ऊं रत्यै ,, । | ३ औं अंगदायै ,, । |
| ३ ऋं धृत्यै ,, । | ३ अं पूर्णायै ,, । |
| ३ ॠं शशिन्यै ,, । | ३ अः पूर्णामृतायै ,, । |

इति षोडश सोमकलाः पूजयेत् ।

ततः पूर्ववत् विदिक्षु मध्ये च ३ प्रथमकूटं हृदयाय नमः हृदय-शक्तिश्रीपादुकां पूजयामि नमः । ३ द्वितीयकूटं शिरसे स्वाहा शिरःशक्तिश्रीपादुकां पूजयामि नमः । ३ तृतीयकूटं शिखायै वषट् शिखाशक्तिश्रीपादुकां पूजयामि नमः । ३ प्रथमकूटं कवचाय हुम् कवचशक्तिश्रीपादुकां पूजयामि नमः । ३ द्वितीयकूटं नेत्रत्रयाय वौषट् नेत्रशक्तिश्रीपादुकां पूजयामि नमः । ३ तृतीयकूटं अस्त्राय फट् अस्त्रशक्तिश्रीपादुकां पूजयामि नमः ।

इति पुष्पैः षडङ्गमभ्यर्चयेत् । इति सामान्यार्घ्यस्थापनम् ।

## अथ विशेषार्घ्यस्थापनम् ॥

सामान्यार्घ्योदकेन तद्दक्षिणतः बिन्दु-त्रिकोण-षट्कोण-वृत्त-चतुरस्रात्मकं मण्डलं परिकल्प्य विन्दौ सानुस्वारं तूर्यस्वर (ई) मालिख्य चतुरस्र प्राग्वत् षडङ्गं विन्यस्य कूटत्रयेण त्रिकोणे कोणान-भ्यर्च्य पुरोभागादि प्रादक्षिण्येन कूटत्रयं द्विरावृत्त्या षट्कोणं कुसुमादिभिः समभ्यर्चयेत् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



३ अग्निमण्डलाय दशकलात्मने विशेषार्घ्यपात्राधाराय नमः । इत्याधारं निधाय तत्र वह्नेर्दशकलाः पूर्ववत् पूजयेत् ।

तदुपरि सुवर्णादिनिर्मित पात्रं अस्त्रक्षालितं ३ ह्रौं सूर्यमण्डलाय द्वादश कलात्मने विशेषार्घ्यपात्राय नमः । इति निधाय सूर्यमण्डलत्वेन विभाविते तत्र ऐं ह्रीं श्रीं ह्रीं ऐं परमस्वामिन्यूर्ध्व-शून्यप्रवाहिनी सोम-सूर्य-अग्निभक्षिणी परमाकाशभासुरे आगच्छागच्छ विश विश पात्रं प्रतिगृह्ण प्रतिगृह्ण हुं फट् स्वाहा । इति पुष्पाञ्जलिं दत्वा प्राग्दर्शितक्रमेण द्वादशदिनेश कलाः संपूजयेत् ।

ततः सौः सोममण्डलाय नमः षोडश कलात्मने विशेषार्घ्यामृताय नमः इति कलशगतं कस्तूरिकादिवासितं क्षीरमभिपूर्य तत्र अष्टगन्धलोलितं कुसुमं निक्षिप्य मूलकशकलान्यार्द्रक खण्डांश्च समिश्र्य सोममण्डलत्वेन विचिन्तिते तत्र षोडशेन्दुकलाः संभाव्य संपूजयेत् ।

तत्र विशेषार्घ्यामृते स्वाग्रकोणादिप्रादक्षिण्येन अकथादिषोडश-वर्णात्मकरेखामयं त्रिकोणं विलिख्य तदन्तः स्वाग्रादिकोणेषु प्राद-क्षिण्येन हलक्षान् विलिख्य बहिश्च मूलखण्डत्रयं विन्दौ म.बिन्दुं(ई) तुरीयस्वरं तद्वामदक्षयोः क्रमेण हंसः इति च वर्णौ विलिख्य ऐं ह्रीं श्रीं हंसः नमः । इति मन्त्रेणाराध्य त्रिकोणस्य परितो वृत्तं तद्बहिः षट्कोणं च विधाय स्वाग्रादिप्रादक्षिण्येन षडङ्गयुवतीः पूजयेत् । यथा ऐं ह्रीं श्रीं प्रथमकूटं श्रीमहात्रिपुरसुन्दरीसर्वज्ञ-शक्तिधाम्ने हृदयाय नमः । ऐं ह्रीं श्रीं द्वितीयकूटं श्रीमहात्रिपुर-सुन्दरीनित्यतृप्तिधाम्ने शिरसे स्वाहा । ऐं ह्रीं श्रीं तृतीयकूटं श्री

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



महात्रिपुरसुन्दरीअनादिबोधशक्तिद्याम्ने शिखायै वषट् । ऐं ह्रीं श्रीं प्रथमकूट श्रीमहात्रिपुरसुन्दरीस्वतन्त्रशक्तिद्याम्ने कवचाय हुं । ऐं ह्रीं श्रीं द्वितीयकूट श्रीमहात्रिपुरसुन्दरीनित्यमलुप्तशक्तिद्याम्ने नेत्रत्रयाय वौषट् । ऐं ह्रीं श्रीं तृतीयकूट श्रीमहात्रिपुरसुन्दरी-अनन्तास्त्रशक्तिद्याम्ने अस्त्राय फट । ततो मूलान्ते चिन्मयीमानन्द-लक्षणामृतकलशस्वभक्ष्यहस्तद्वयां सुप्रसन्नां देवीं पूजयामि स्वाहा ।

इति सुधादेवीं समभ्यर्च्य तदर्घ्यात् किञ्चित् पात्रान्तरेण वषडिति उद्धृत्य ॐ ३ स्वाहेति तत्रैवार्घ्यामृते निक्षिप्य ऐं ह्रीं श्रीं हुं इति अवगुण्ठ्य ऐं ह्रीं श्रीं वौषडिति धेनुमुद्रयामृतीकृत्य ऐं ह्रीं श्रीं फडिति संरक्ष्य ऐं ह्रीं श्रीं नमः ।

इति पुष्पं दत्वा गालिन्या मुद्रया मूलेन निरीक्ष्य योनिमुद्रया नत्वा मूलेन सप्तवारमभिमन्त्र्य गंध-पुष्प-धूप-दीप-नैवेद्यादिकं दत्वा विशेषार्घ्यपृषद्भिः संप्रोक्ष्य सपर्यासाधनानि सर्वं च विद्यामयं विभाव्य विशेषार्घ्यपात्रं करेण स्पृष्ट्वा चतुर्णवति मन्त्रै-रभिमन्त्रयेत् । तत्र मन्त्राश्च त्रितारनमः संपुटिताः । तद्यथा—

| | | | | | |
|---|---|---|---|---|---|
| ऐं ह्रीं श्रीं यं | धूम्रार्चिषे | नमः । | ऐं ह्रीं श्रीं ळं | हव्यवाहायै | नमः । |
| ३ | रं उष्मायै | „ । | ३ | क्षं कव्यवाहायै | „ । |
| ३ | लं ज्वलिन्यै | „ । | ३ | कं भं तपिन्यै | „ । |
| ३ | वं ज्वालिन्यै | „ । | ३ | खं बं तापिन्यै | „ । |
| ३ | शं विस्फुलिङ्गिन्यै | „ । | ३ | गं फं धूम्रायै | „ । |
| ३ | षं सुश्रियै | „ । | ३ | घं पं मरीच्यै | „ । |
| ३ | सं सुरूपायै | „ । | ३ | ङं नं ज्वालिन्यै | „ । |
| ३ | हं कपिलायै | „ । | ३ | चं धं रुच्यै | „ । |

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ऐं ह्रीं श्रीं छं दं सुषुम्णायै ,, ।
३ जं थं भोगदायै ,, ।
३ झं तं विश्वायै ,, ।
३ ञं णं बोधिन्यै ,, ।
३ टं ढं धारिण्यै ,, ।
३ ठं डं क्षमायै ,, ।
३ अं अमृतायै ,, ।
३ आं मानदायै ,, ।
३ इं पूषायै ,, ।
३ ईं तुष्ट्यै ,, ।
३ उं पुष्ट्यै ,, ।
३ ऊं रत्यै ,, ।
३ ऋं धृत्यै ,, ।
३ ॠं शशिन्यै ,, ।
३ ऌं चन्द्रिकायै ,, ।
३ ॡं कान्त्यै ,, ।
३ एं ज्योत्स्नायै ,, ।
३ ऐं श्रियै ,, ।
३ ओं प्रीत्यै ,, ।
३ औं अंगदायै ,, ।
३ अं पूर्णायै ,, ।
३ अः पूर्णामृतायै ,, ।
३ कं सृष्ट्यै ,, ।
३ खं ऋद्ध्यै ,, ।
३ गं स्मृत्यै ,, ।
३ घं मेधायै ,, ।
३ ङं कान्त्यै ,, ।

ऐं ह्रीं श्रीं चं लक्ष्म्यै नमः ।
३ छं धृत्यै ,, ।
३ जं स्थिरायै ,, ।
३ झं स्थित्यै ,, ।
३ ञं सिद्धायै ,, ।
इति ब्रह्मणोदश कलाः ।
३ टं जरायै ,, ।
३ ठं पालिन्यै ,, ।
३ डं शान्त्यै ,, ।
३ ढं ऐश्वर्यै ,, ।
३ णं रत्यै ,, ।
३ तं कामिकायै ,, ।
३ थं वरदायै ,, ।
३ दं आह्लादिन्यै ,, ।
३ धं प्रीत्यै ,, ।
३ नं दीर्घायै ,, ।
इति विष्णोर्दशकलाः ।
३ पं तीक्ष्णायै ,, ।
३ फं रौद्रयै ,, ।
३ बं भयायै ,, ।
३ भं निद्रायै ,, ।
३ मं तन्द्रायै ,, ।
३ यं क्षुधायै ,, ।
३ रं क्रोधिन्यै ,, ।
३ लं क्रियायै ,, ।
३ वं उत्कायै ,, ।
३ शं मृत्यवे ,, ।
इति दश रुद्रकलाः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| ऐं ह्रीं श्रीं | षं | पीतायै | ,, | । | ऐं ह्रीं श्रीं | ऊं | दीपिकायै | ,, । |
| ३ | सं | श्वेतायै | ,, | । | ३ | ऋं | रेचिकायै | ,, । |
| ३ | हं | अरुणायै | ,, | । | ३ | ॠं | मोचिकायै | ,, । |
| ३ | क्षं | असितायै | ,, | । | ३ | ऌं | परायै | ,, । |
| इति ईश्वरस्य चतस्रः कलाः । | | | | | ३ | ॡं | सूक्ष्मायै | ,, । |
| | | | | | ३ | एं | सूक्ष्मामृतायै | ,, । |
| ३ | अं | निवृत्यै | ,, | । | ३ | ऐं | ज्ञानायै | ,, । |
| ३ | आं | प्रतिष्ठायै | ,, | । | ३ | ओं | ज्ञानामृतायै | ,, । |
| ३ | इं | विद्यायै | ,, | । | ३ | औं | आप्यायिन्यै | ,, |
| ३ | ईं | शान्त्यै | ,, | । | ३ | अं | व्यापिन्यै | ,, |
| ३ | उं | इन्धिकायै | ,, | । | ३ | अः | व्योमन्यै | ,, । |

इति सदाशिवस्य षोडशकलाः आहत्य अष्टाशीतिः ।

३ हंसः शुचिषद्वसुरन्तरिक्षसद्धोतावेदिषदतिथिर्दुरोणसत् ।
नृषद्वरसदृतसद्व्योमसदब्जागोजाऽऋतजाऽअद्रिजाऽऋतं बृहत् ॥१॥

३ प्रतद्विष्णुस्तवते वीर्येण मृगो न भीमः कुचरो गिरिष्ठाः ।
यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियन्ति भुवनानि विश्वा ॥२॥

३ त्र्यंम्बकं यजामहे सुगन्धिं पुष्टिवर्द्धनम् । उर्वारुकमिवबन्धना
न्मृत्योर्मुक्षीयमामृतात् ॥३॥

३ तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः ।
दिवीव चक्षुराततम् ॥४॥

३ तद्विप्रा सो विपन्यवो जागृवांसः समिन्धते ।
विष्णोर्यत्परमं पदम् ॥५॥

३ विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि पिंशतु ।
आसिंचतु प्रजापतिर्धाता गर्भं दधातु मे ।
गर्भं धेहि सिनीवालि गर्भं धेहि सरस्वति ।
गर्भंतेऽअश्विनौ देवावाधत्तां पुष्करस्रजौ ॥६॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



३ ऐं अखण्डैकरसानन्दकरे परसुधात्मनि ।
स्वच्छन्दस्फुरणामत्र निधेहि कुलनायिके ॥१॥
३ क्लीं अकुलस्थामृताकारे शुद्धज्ञानकरे परे ।
अमृतत्वं निधेह्यस्मिन् वस्तुनि क्लिन्नरूपिणि ॥२॥
३ सौः त्वद्रूपण्यैकरसस्य त्वं कृत्वा ह्येतत्स्वरूपिणि ।
भूत्वा परामृताकारा मयि चित्स्फुरणं कुरु ॥३॥
३ ऐं प्लूं ह्स्रौः जूं मः अमृते अमृतोद्भवे अमृतेश्वरि अमृत-वर्षिणि अमृतं स्रावय स्रावय स्वाहा ॥४॥
३ ऐं वद वद वाग्वादिनि ऐं क्लीं क्लिन्ने क्लेदिनि क्लेदय क्लेदय महाक्षोभं कुरु कुरु क्लीं सौः मोक्षं कुरु कुरु ह्सौः स्हौः स्वाहा ॥५॥
मूलेन सप्तवारं जपेत् ॥ इत्यर्घशोधनम् ।

इति विशेषार्घ्यस्थापनम् ।

## अथात्मपात्रस्थापनम् ।

त्रिकोण-वृत्त-चतुरस्रात्मकं मण्डलं विलिख्य मूलेन अभ्यर्च्य आधारोपरि आत्मपात्रं संस्थाप्य—
ऐं ह्रीं श्रीं हंसः हंसाय नमः इत्यभ्यर्चयेत् ।

## गुरुपात्रस्थापनम् ।

विशेषार्घ्यपात्रस्य दक्षभागे त्रिकोणवृत्तचतुरस्रात्मकं मण्डलं विलिख्य मूलेन अभ्यर्च्य आधारोपरि गुरुपात्रं संस्थाप्य—
ॐ ऐं ह्रीं श्रीं ऐं क्लीं सौः हंसः शिवः सोऽहं हंसः शिवः ह्स् ख् फ्रें हसक्षमलवरयूं स् ह् ख् फ्रें सहक्षमलवरयीं ह्सौः स्हौः नमः इति अभिमन्त्रयेत् ।

विशेषार्घ्यामृतात् किञ्चित् गुरुपात्रे उद्धृत्य गुरुत्रयं यजेत् । सन्निहिताय गुरवे निवेदयेत् ।

पुनः आत्मपात्रे किञ्चिद् विशेषार्घ्यामृतमुद्धृत्य स्वशिरसि श्रीगुरुं त्रिपुरुषगुरुपादुकामन्त्रेण यजेत् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ऐं ह्रीं श्रीं मूलं पुण्यं जुहोमि स्वाहा ।

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| ,, | पापं | ,, | ,, | ,, | विकल्पं | ,, | ,, |
| ,, | कृत्यं | ,, | ,, | ,, | धर्मं | ,, | ,, |
| ,, | अकृत्यं | ,, | ,, | ,, | अधर्मं | ,, | ,, |
| ,, | संकल्पं | ,, | ,, | ,, | अधर्मं | ,, | वौषट् |

ऐं ह्रीं श्रीं इतः पूर्वं प्राणबुद्धिदेहधर्माधिकारतः जाग्रत्स्वप्नसुषुप्त्यवस्थासु मनसा वाचा कर्मणा हस्ताभ्यां पद्भ्यां मुदरेण शिश्ना यत्स्मृतं यदुक्तं यत्कृतं तत्सर्वं ब्रह्मार्पणं भवतु स्वाहा । इति पूर्णाहुतिं विभाव्य ।

ऐं ह्रीं श्रीं आर्द्र ज्वलति ज्योतिरहमस्मि । ज्योतिर्ज्वलति ब्रह्माहमस्मि योऽहमस्मि ब्रह्माहमस्मि अहमस्मि ब्रह्माहमस्मि अहमेवाहं मां जुहोमि स्वाहा ।

इति मंत्रेण आत्मनः कुण्डलिनीरूपे चिदग्नौ होमबुद्ध्या जुहुयात् । आविसर्जनं शंखं विशेषार्घ्यपात्रं च न चालयेत् । इति पात्रासादनम् ॥

## आवाहनम् ॥

मूलाधारादाब्रिह्मबलं विलसन्ती बिसतन्तुतनीयसीं विद्युत्पुञ्जपिञ्जरां विवस्वद्युतभास्वत्प्रकाशां परशशतसुधामयूखशीतलां तेजोदण्डरूपां परचितिं भावयेदिति ।

अथ हृदि श्रीचक्रं विभाव्य तत्र तामेव स्वीकृतप्रागुक्तरूपां श्रीदेवीं ध्यायेत् यथा—

बालार्कमण्डलाभासां चतुर्बाहुं त्रिलोचनाम् ।
पाशाङ्कुशधनुर्बाणान् धारयन्तीं शिवां भजे ॥

मानसै रुपचर्य तां पुनस्तेजोरूपेण परिणतां परमशिवज्योतिरभिन्नप्रकाशात्मिकां वियदादि विश्वकारणां सर्वावयवावभासिकां स्वात्माभिमा परचितिं सुषुम्णापथेन उद्गमय्य विनिर्भिन्न

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विधिबिलविलसदमलदशशतदलकमलाद् वहन्नासापुटेन निर्गतं त्रिखण्डामुद्रामण्डितशिखण्डे कुसुमगर्भिते अञ्जलौ समानीय ।

ॐ ऐं ह्रीं श्रीं ह्रौं श्रीं सौः श्रीललिताया अमृतचैतन्यमूर्तिं कल्पयामि नमः । इति मन्त्रमुच्चारयन् निजलीलाङ्गीकृत ललित-वपुषं विचिन्त्य ।

ॐ ऐं ह्रीं श्रीं ह् स्रैं ह् स् क् ल् ह्रीं हस्त्रौः

महापद्मवनान्तस्थे कारणानन्दविग्रहे ।
सर्वभूतहितेमातः एह्येहि परमेश्वरि ॥१॥
एह्येहि देवि देवेशि त्रिपुरे सुरपूजिते ।
परामृतप्रिये शीघ्रं सान्निध्यं कुरु सिद्धिदे ॥२॥
देवेशि भक्तिसुलभे सर्वावरणसंयुते ।
यावत्त्वां पूजयिष्यामि तावत्त्वं सुस्थिरा भव ॥३॥

इति तां बैन्दवचक्रे समावाह्य आवाहनादि मुद्राः प्रदर्शयेत् । यथा—

| | | | |
|---|---|---|---|
| ॐ ऐं ह्रीं श्रीं | आवाहिता भव । | ४ | संन्निरुद्धा भव । |
| ४ | संस्थापिता भव । | ४ | संमुखीकृता भव । |
| ४ | संन्निधापिता भव । | ४ | आवगुण्ठिता भव । |

वन्दन-धेनु-योनिमुद्राः प्रदर्शयेत् । एतदखिलं भावयेत् । अत्र च-मेरुमंत्रात्मके चक्रे श्रीत्रिषस्तत्र देवता ।

कामेश्वरः प्रकाशात्मा श्रीविमर्शस्तदङ्कका ॥१॥
इत्येतद्वासनारूपमभेदं च परस्परम् ।
ज्ञात्वा श्रीगुरुवक्त्राब्जात् कृतापूजा महाफला ॥२॥

## चतुःषष्ट्युपचारपूजा ।

अथ परदेवतायाः चतुःषष्टयुपचारान् आचरेत् । तेष्व-शक्तानां भावनया सामान्यार्घ्योदकं किञ्चिदम्बाचरणाम्बुजे अर्पण-बुद्धया पात्रान्तरे विनिःक्षिपेत् । पुष्पाक्षता वा समर्पयेत् । यथाः—

For Private and Personal Use Only

ऐं ह्रीं श्रीं ललितायै नमः पाद्यं कल्पयामि नमः ।

३ ललितायै०आभरणावरोपणं०
,, सुगन्धतैलाभ्यङ्गं०
,, मज्जनशालाप्रवेशनं०
,, मज्जनमण्डपमणि
पीठोपवेशनम्०
,, दिव्यस्नानीयोद्वर्तनं०
,, उष्णोदकस्नान०
,, कनककलशच्युतस्नानं०
,, सकलतीर्थाभिषेचनं०
,, धौतवस्त्रपरिमार्जनं०
,, अरुणदुकूलपरिधानं०
,, अरुणकुचोत्तरीयं०
,, आलेपमण्डपप्रवेशनं०
,, ,, मणिपीठोपवेशनं०
,, चन्दन-गरुकुङ्कुममृगमद ।
कर्पूरकस्तूरीगोरोचनादि-
दिव्यगन्धसर्वाङ्गीयविलेपनं०
,, केशभारस्य कालागरुधूपं०
,, मल्लिकामालतीजातीचंपकाशो
कशतपत्रपूगकुहलीपुन्नागकल्हार
मुख्यसर्वर्तुषुकुसुममालाः०
,, भूषणमण्डपप्रवेशनं०
,, ,, मणिपीठोपवेशनं०
,, नवमणिमुकुटं०
,, चन्द्रसकलं०
,, सीमन्तसिन्दूरं०

,, तिलकरत्नं०
,, कालाञ्जनं०
,, बालीयुगलं०
,, मणिकुण्डलयुगलम्०
,, नासाभरणं०
,, अधरयावकं०
,, प्रथमभूषण०
,, कनकांचिताकं०
,, पदकं०
,, महापदकं०
,, मुक्तावलीं०
,, एकावलीं०
,, काञ्चीदाम०
,, कटिसूत्रं०
,, सौभाग्याभरण०
,, पादकटकं०
,, रत्ननूपुरं०
,, पादाङ्गुलीयकं०
,, एककरे पाशं०
,, अन्यकरे अङ्कुशं०
,, इतरकरे पुण्ड्रेक्षुचापं०
,, अपरकरे पुष्पबाणान्०
,, श्रीमन्माणिक्यपादुके०
,, स्वसमानवेषाभिः आवरण
देवताभिः सह
महाचक्राधिरोहणं०

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



| | |
|---|---|
| ,, कामेश्वराङ्कपर्य्यङ्कोपवेशनं० | ,, चामरयुगलं० |
| ,, अमृतामन्त्रचषकं० | ,, दर्पणं० |
| ,, आचमनीयं० | ,, तालवृन्तं० |
| ,, कर्पूरवीटिकां० | ,, गन्धं० |
| ,, आनन्दोल्लासविलासहासं० | ,, पुष्पं० |
| ,, मंगलारार्तिकं० | ,, धूपं० |
| ,, छत्रं० | ,, दीपं० |

देव्या अग्रतः स्वदक्षिणे चतुरस्रमण्डलं कृत्वा आधारोपरि निहित कनकरौप्यादिभाजनभरितं फलविशेषखण्ड-सिकता-[illegible]डुकादि-नैवेद्यं मूलेन प्रोक्ष्य वं इति धेनुमुद्रयामृतीकृत्य मूलेन त्रिवारम-भिमन्त्र्य ऐं ह्रीं श्रीं श्रीललितायै नमः आपोशनं कल्पयामि नमः ।

| | |
|---|---|
| अमृतोपस्तरणमसि स्वाहा । | ३ सौः व्यानाय स्वाहा |
| ३ ऐं प्राणाय स्वाहा । | ३ ऐं क्लीं उदानाय स्वाहा । |
| ३ क्लीं अपानाय स्वाहा । | ३ क्लीं सौः समानाय स्वाहा । |

ततः साङ्गायै सायुधायै सपरिवारायै श्रीललितायै नमः ।

हेमपात्रगतं दिव्यं परमान्नं सुसंस्कृतम् ।
पञ्चधा षडरसोपेतं गृहाण परमेश्वरि ॥

ऐं ह्रीं श्रीं श्रीललितायै नमः । नैवेद्यं कल्पयामि नमः ।

देवीं भुक्तवतीं ध्यात्वा क्षणं स्थित्वा श्रीललितायै नमः अमृतापि-धानमसि स्वाहा । इत्युत्तरापोशनं दत्वा—

४ कएईलह्रीं आत्मतत्त्वव्यापिनी श्रीललिताम्बा तृप्यतु ।
४ हसकहलह्रीं विद्यातत्त्वव्यापिनी श्रीललिताम्बा तृप्यतु !
४ ह्रीं सकलह्रीं शिवतत्त्वव्यापिनी श्रीललिताम्बा तृप्यतु ।
ॐ ऐं ह्रीं श्रीं मूल सकलतत्त्वव्यापिनी श्रीललिताम्बा तृप्यतु ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



३ तृप्तवतीं देवीं विभाव्य गतसारं नैवेद्यमुद्धृत्य नैर्ऋत्यां-निरस्य भूमिमस्त्रेण संशोध्य—

३ ल. न. हस्तप्रक्षालनं कल्पयामि नमः

३ „ गण्डुषान्०

३ „ आचमनीयं०

३ „ कर्पूरवीटिकां०.

३ „ दक्षिणां०

३ „ मन्त्रपुष्पं०

द्रां द्रीं क्लीं ब्लूं सः क्रों ह्र, स्र्, ख फ्रें ह्र सौः ऐं इति संक्षोभिणी-सर्वविद्राविणी-सर्वाकर्षिणी-सर्ववशंकरी-सर्वोन्मादिनी-सर्वमहाङ्कुशा-सर्वखेचरी-सर्ववीजा-सर्वत्रिखण्डा इति नवमुद्राः प्रदर्शयेत् ।

ॐ ऐं ह्रीं श्रीं मूलं श्रीललिताम्बामहात्रिपुरसुन्दरीश्रीपादुकां पूजयामि तर्पयामि नमः । इति विशेषार्घ्यविन्दुभिः श्रीदेवीं त्रिः पूजयेत् तर्पयेच्च ।

### आवरणपूजा[१५] ।

**पूजितासि यथाशक्त्या यथालब्धोपचारकैः ।**
**अनुज्ञां देहि देवेशि परिवारार्चनाय मे ॥**

इति तत्त्वमुद्रां प्रदर्शयेत । आर्द्रकशकलगृहीतविशेषार्घ्यपात्रविन्दु-सहार्पितैर्दक्षकरोपात्तकुसुमाक्षतैः श्रीदेवीं त्रिस्तर्पयेत् । अनेनैव

१५ તાંત્રિક માર્ગથી પૂજા કરતાં ઇષ્ટ દેવતાના પરિવાર દેવતાઓનું પણ પૂજન કરવામાં આવે છે. આ પરિવાર દેવતાઓના પૂજનને આવરણ પૂજન એમ પણ કહે છે. આવરણ પૂજા પછી ધૂપ-દીપ-નૈવેદ્ય-બલિપ્રદાન (વિશેષ પૂજા) હોમ તથા ફરીથી પૂજન (ઉતરપૂજન) અને સુવાસિની પૂજા તથા ઉદ્‌વાસન (યંત્ર કે મૂર્તિમાં પૂજન કરેલા દેવતાનું પોતાના હૃદયમાં સ્થાપન કરવામાં આવે તે) ક્રિયા કરવાની હોય છે. હોમ એ કૃતાકૃત છે. એટલે કરવો જ જોઈએ એવું નથી.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रकारेण सर्वासामावरणदेवतानां तर्पणं ज्ञेयम्। श्रोदे॑ऽयङ्गे अग्नीशासुरवायुकोणेषु मध्ये दिक्षु च पूर्वोक्तविधिना षडङ्गान्यभ्यर्चयेत्।
कएईलह्रीं हृदयाय नमः हृदयशक्तिश्रीपादुकां पूजयामि तर्पयामि।
हसकहलह्रीं शिरसे स्वाहा शिरःशक्ति ,, ,, ,,
सकलह्रीं शिखायै वषट् शिखाशक्ति ,, ,, ,,
कएईलह्रीं कवचाय हुं कवचशक्ति ,, ,, ,,
हसकहलह्रीं नेत्रत्रयाय वौषट् नेत्रशक्ति ,, ,, ,,
सकलह्रीं अस्त्राय फट् अस्त्रशक्ति ,, ,, ,,

अथ मध्यत्रिकोणस्य दक्षिणरेखायां वारुण्यादाग्नेयान्तक्रमेण अं आं इं ईं उं इति पूर्वरेखायां।
ऊं ऋं ॠं लृं ॡं इत्युत्तररेखायां।
ईशान्यादि वारुण्यान्तं एं ऐं ओं औं अं।

इति पञ्च पञ्च स्वरान् विभाव्य तेषु वामावर्तेनैव प्रागुक्तस्वरूपाः कामेश्वर्यादिनित्या यजेत्। विन्दौ च षोडशं स्वरं (अः) विचिन्त्य महानित्यां पूजयेत् तर्पयेच्च। अथ शुक्लपक्षे कामेश्वर्यादिचित्रान्ताः कृष्णपक्षे तु चित्रादिकामेश्वर्यन्ता नित्याः पूजयेत्। तिथिवृद्धौ एकां नित्यां दिनद्वये पूजयेत्। तिथिक्षये एकस्मिन् दिने नित्याद्वयं पूजयेत्। तथैव तिथिनित्यां पूजयेत् तर्पयेच्च। पुनर्महानित्यां यजेत् यथा—

ऐं ह्रीं श्रीं अं ऐं सकलह्रीं नित्यक्लिन्ने मदद्रवे सौः अं कामेश्वरीनित्या श्रीपादुकां पूजयामि तर्पयामि।

ऐं ह्रीं श्रीं आं ऐं भगभुगे भगिनि भगोदरि भगमाले भगावहे भगगुह्ये भगयोनि भगनिपातिनि सर्वभगवशंकरि भगरूपे नित्यक्लिन्ने भगस्वरूपे सर्वाणि भगानि मे ह्यानय वरदे रेते सुरेते भगक्लिन्ने

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



क्लिन्नद्रवे क्लेदय द्रावय अमोघे भगविच्चे क्षुभ क्षोभय सर्व-सत्त्वान् भगेश्वरि ऐं ब्लू जें ब्लूं भें ब्लूं मों ब्लूं हे ब्लूं हे क्लिन्ने सर्वाणि भगानि मे वशमानय स्त्रीं ह्र र ब्लें ह्रीं आं भगमालिनिनित्या०॥

३ इं ओं ह्रीं नित्यक्लिन्ने मदद्रवे स्वाहा इं नित्यक्लिन्नानित्या० ।

३ ईं ओं क्रों भ्रों क्रों झ्रौं च्छ्रों ज्रों स्वाहा ईं भेरुण्डानित्या० ।

३ उं ओं ह्रीं वह्निवासिन्यै नमः उं वह्निवासिनीनित्या० ।

३ ऊं ह्रीं क्लिन्ने ऐं क्रों नित्यमदद्रवे ह्रीं ऊं महावज्रेश्वरीनित्या०।

३ ऋं ह्रीं शिवदूत्यै नमः ऋं शिवदूतीनित्या० ।

३ ॠं ओं ह्रीं हुं खे च छे क्षः स्त्रीं हुं क्षें ह्रीं फट् ॠं त्वरितानित्या० ।

३ लृं ऐं क्लीं सौः लृं कुलसुन्दरीनित्या० ।

३ लॄं हसकलरडैं हसकलरडीं हसकलरडौः लॄं नित्यानित्या ० ।

३ एं ह्रीं फ्रें स्रूं क्रों आं क्लीं ऐं ब्लूं नित्यमदद्रवे हुं फें ह्रीं एं नीलपताकानित्या० ।

३ ऐं भ म र य औं ऐं विजयानित्या० ।

३ ओं स्वौं ओं सर्वमङ्गलानित्या० ।

३ औं नमो भगवति ज्वालामालिनि देवदेवि सर्वभूतसंहारकारिके जातवेदसि ज्वलन्ति ज्वल ज्वल प्रज्वल प्रज्वल ह्रां ह्रूं ह्रीं र र र र र र र ज्वालामालिनि हुं फट् स्वाहा औं ज्वालामालिनीनित्या०।

३ अं अंच्कौं अं चित्रानित्या० ।

३ अः मूलं ललितामहानित्या० ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ततो देव्याः पश्चान्मूलत्रिकोणस्य पूर्वरेखासमीपे दिव्य-सिद्धमानवाख्यमोघत्रयं मुनिवेदवसुसंख्यं समर्चयेत् यथा—

३ परप्रकाशानन्दनाथ० ।
३ परशिवानन्दनाथ ०
३ पराशक्त्यम्बानाथ०
३ कौलेश्वरानन्दनाथ०
३ शुक्लादेव्यम्बा०
३ कुलेश्वरानन्दनाथ०
३ कामेश्वरानन्दनाथ०
इति दिव्यौघः ।
३ भोगानन्दनाथ०
३ क्लिन्नानन्दनाथ०
३ समयानन्दनाथ०
३ सहजानन्दनाथ०
इति सिद्धौघः ।
३ गगनानन्दनाथ०
३ विश्वानन्दनाथ०
३ विमलानन्दनाथ०
३ मदनानन्दनाथ०
३ भुवनानन्दनाथ०
३ लीलानन्दनाथ०
३ स्वात्मानन्दनाथ०
३ प्रियानन्दनाथ०
इति मानवौघः ।

ततः स्वशिरसि श्रीगुरुपादुकामन्त्रेण श्रीगुरुं त्रिर्जपेत् । यथा-ॐ ऐं ह्रीं श्रीं ह्रू सू ख फ्रें ह स क्ष म ल व र यूँ सू ह्र खू फ्रें स ह क्ष म ल व र यी हंसः सोहं हसौः स्हौः स्व गुरुश्री... नन्दनाथ श्रीपादुकांपूज्यामि तर्पयामि

ॐ ऐं ह्रीं श्रीं ... परमगुरुश्री...नन्दनाथ श्रीपादुकांपूजयामि तर्पयामि । ॐ ऐं ह्रीं श्रीं ... परमेष्ठिगुरुश्री....नन्दनाथ श्रीपादुकां-पूजयामि तर्पयामि ।

इतिगुरुमण्डलार्चनम् । एतावल्लयाङ्गपूजनम् ।

## अथावरणपूजा ।

चतुरस्रस्य प्रवेशरीत्या प्रथमरेखायां पश्चिमादि द्वारचतुष्टय दक्षिणभागेषु वायव्यादिकोणेषु च पश्चिमनैरृतयोः पूर्वैशानयोश्च मध्ये क्रमेण-ॐ ऐं ह्रीं श्रीं अणिमासिद्धि० । ४ लघिमासिद्धि० । ४ महिमा सिद्धि । ४ ईशित्वसिद्धि.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



३ महिमासिद्धि०
३ ईशित्वसिद्धि०
३ वशित्वसिद्धि०
३ प्राकाम्यसिद्धि०
३ भुक्तिसिद्धि०
३ इच्छासिद्धि०
३ प्राप्तिसिद्धि०
३ सर्वकामसिद्धि०

अथ चतुरस्रस्य द्वितीयरेखायां प्रागुक्तद्वार-वामभागेषु कोणेषु च—

३ ब्राह्मी०
३ माहेश्वरीं०
३ कौमारीं०
३ वैष्णवी०
३ वाराही०
३ माहेन्द्री०
३ चामुण्डा०
३ महालक्ष्मी०

ततश्चतुरस्रान्त्यरेखायां प्रथमरेखोक्तक्रमेण —

ऐं ह्रीं श्रीं सर्वसंक्षोभिणीश्रीपादुकां पूजयामि तर्पयामि ।

३ सर्वविद्राविणी०
३ सर्वाकर्षिणी०
३ सर्ववशङ्करी०
३ सर्वोन्मादिनीं०
३ सर्वमहाङ्कुशा०
३ सर्वखेचरी०
३ सर्वबीजा०
३ सर्वयोनि०
३ सर्वत्रिखण्डा०

इति पूजयित्वा एताः प्रकटयोगिन्यः त्रैलोक्यमोहने चक्र समुद्राः ससिद्धयः सशक्तयः सवाहनाः सपरिवाराः सर्वोपचारैः पूजितास्तर्पिताः सन्तु नमः । इति तासामेव समष्ट्यर्चनं पुष्पाञ्जलिना कृत्वा अणिमासिद्धिःपुरत.—

३ अं आं सौः त्रिपुराचक्रेश्वरींश्रीपादुकां पूजयामि तर्पयामि । द्रां इति सर्वसंक्षोभिणीमुद्रां प्रदर्श्य सामान्यार्घ्योदकेन गन्धं पुष्पं धूपं दीपं नैवेद्यं च दत्वा—

अभीष्टसिद्धिं मे देहि शरणागतवत्सले ।
भक्त्या समर्पये तुभ्यं प्रथमावरणार्चनम् ॥

इति देव्यै पूजां समर्प्य योन्या प्रणमेत् । इति प्रथमावरणम् ।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## अथ द्वितीयावरणार्चनम् ।

अथ षोडशदलकमले देव्यग्रदलमारभ्य वामावर्तेन —

| | |
|---|---|
| ३ अं कामाकर्षिणी० | ३ लृं चित्ताकर्षिणी० |
| ३ आं बुद्ध्याकर्षिणी० | ३ लॄं धैर्याकर्षिणी० |
| ३ इं अहङ्काराकर्षिणी० | ३ एं स्मृत्याकर्षिणी० |
| ३ ईं शब्दाकर्षिणी० | ३ ऐं नामाकर्षिणी० |
| ३ उं स्पर्शाकर्षिणी० | ३ ओं बीजाकर्षिणी० |
| ३ ऊं रूपाकर्षिणी० | ३ औं आत्माकर्षिणी० |
| ३ ऋं रसाकर्षिणी० | ३ अं अमृताकर्षिणी० |
| ३ ॠं गन्धाकर्षिणी० | ३ अः शरीराकर्षिणी० |

एताः गुप्तयोगिन्यः सर्वाशापरिपूरकचक्रे समुद्राः ससिद्धयः सायुधाः सशक्तयः सवाहनाः सपरिवाराः सर्वोपचारैः पूजितास्तर्पिताः सन्तु नमः ।

इति तासामेव समष्ट्यर्चनं पुष्पाञ्जलिना विधाय कामाकर्षिण्याः पुरतः ऐं क्लीं सौः त्रिपुरेशी चक्रेश्वरी श्रीपादुकां पूजयामि तर्पयामि नमः । द्रीं इति सर्वविद्राविणीमुद्रां प्रदर्श्य गन्धं पुष्पं धूपं दीपं नैवेद्यं दत्वा —

अभीष्टसिद्धिं मे देहि शरणागतवत्सले ।<br>
भक्त्या समर्पये तुभ्यं द्वितीयावरणार्चनम् ॥

इति देव्यै पूजां समर्प्य योन्या प्रणमेत् । इति द्वितीयावरणम् ।

## अथ तृतीयावरणार्चनम् ।

अथाष्टपत्रे श्रीदेव्याः पृष्ठदलमारभ्य पूर्वादिदिक्षु आग्नेयादि विदिक्षु च क्रमात्

| | |
|---|---|
| ३ कं खं गं घं ङं अनङ्गकुसुमा० | ३ टं ठं डं ढं णं अनङ्गमदना० |
| ३ चं छं जं झं ञं अनङ्गमेखला० | ३ तं थं दं धं नं अनङ्गमदनातुरा० |

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



३ पं फं बं भं मं अनङ्गरेखा० | ३ शं षं सं हं अनङ्गांकुशा०
३ यं रं लं वं अनङ्गवेगिनी० | ३ ळं क्षं अनङ्गमालिनी०

एताः गुप्ततरयोगिन्यः सर्वसंक्षोभणे चक्रे समुद्राः ससिद्धयः सायुधाः सशक्तयः सवाहनाः सपरिवाराः सर्वोपचारैः पूजितास्तर्पिताः सन्तु नमः ।

इति तासामेव समष्ट्यर्चनं पुष्पाञ्जलिना कृत्वा अनङ्गकुसुमाग्रे ऐं ह्रीं श्रीं ह्रीं क्लीं सौः त्रिपुरसुन्दरीचक्रेश्वरी श्रीपादुकां पूजयामि तर्पयामि नमः । क्लीं सर्वाकर्षिणीमुद्रां प्रदर्श्य गन्धं पुष्पं धूपं दीपं नैवेद्यं दत्वा—

अभीष्टसिद्धिं मे देहि शरणागतवत्सले ।
भक्त्या समर्पये तुभ्यं तृतीयावरणार्चनम् ॥

इति देव्यै पूजां समर्प्य योन्या प्रणमेत् । इति तृतीयावरणम् ।

## अथ चतुर्थावरणार्चनम् ।

चतुर्दशारे देव्यग्रकोणमारभ्य वामावर्तेन—

३ कं सर्वसंक्षोभिणी०
३ खं सर्वविद्राविणी०
३ गं सर्वाकर्षिणी०
३ घं सर्वाह्लादिनी०
३ ङं सर्वसंमोहिनी०
३ चं सर्वस्तम्भिनी०
३ छं सर्वजृंभिणी०
३ जं सर्ववशंकरी०
३ झं सर्वरञ्जिनी०
३ ञं सर्वोन्मादिनी०
३ टं सर्वार्थसाधिनी०
३ ठं सर्वसंपत्तिपूरणी०
३ डं सर्वमन्त्रमयी०
३ ढं सर्वद्वन्द्वक्षयंकरी०

एताः संप्रदाययोगिन्यः सर्वसौभाग्यदायके चक्रे समुद्राः सवाहनाः सशक्तयः इत्यादि प्राग्वत् समष्ट्यर्चनं पुष्पाञ्जलिना कृत्वा सर्वसंक्षोभिण्याः पुरतः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ऐं ह्रीं श्रीं हैं ह्र् क्लीं ह्रसौः त्रिपुरवासिनीचक्रेश्वरी श्रीपादुकां- पूजयामि तर्पयामि नमः । ३ ब्लूं सर्ववशङ्करीमुद्रां प्रदर्श्य गन्धं पुष्पं धूपं दीपं नैवेद्यं च दत्वा ।

अभीष्टसिद्धिं मे देहि शरणागतवत्सले ।
भक्त्या समर्पये तुभ्यं चतुर्थावरणार्चनम् ॥

इति देव्यै पूजां निवेद्य योन्या प्रणमेत् । इति चतुर्थावरणम् ।

## अथ पञ्चमावरणम् ।

अथ बहिर्दशारे देव्यग्रकोणाधः प्रादक्षिण्येन—

| | |
|---|---|
| ३ णं सर्वसिद्धिप्रदा० | ३ नं सर्वदुःखविमोचिनी० |
| ३ तं सर्वसंपत्प्रदा० | ३ पं सर्वमृत्युप्रशमनीं० |
| ३ थं सर्वप्रियंकरा० | ३ फं सर्वविघ्ननिवारिणी० |
| ३ दं सर्वमङ्गलकारिणी | ३ बं सर्वाङ्गसुन्दरी० |
| ३ धं सर्वकामप्रदा० | ३ भं सर्वसौभाग्यदायिनी० |

एताः कुलोत्तीर्णयोगिन्यः सर्वार्थसाधकचक्रे समुद्राः इत्यादि पूर्ववत्। पुष्पाञ्जलिना समष्ट्यर्चनं विधाय सर्वसिद्धिप्रदायाः पुरतः ।

ऐं ह्रीं श्रीं ह्रस्त्रैं हस्क्लीं हस्त्रौः त्रिपुराश्रीचक्रेश्वरीश्रीपादुकां पूजयामि तर्पयामि नमः।

ऐं ह्रीं श्रीं सः इति सर्वोन्मादिनीमुद्रां प्रदर्श्य गन्धं पुष्पं धूपं दीपं नैवेद्यं च दत्वा—

अभीष्टसिद्धिं मे देहि शरणागतवत्सले ।
भक्त्या समर्पये तुभ्यं पञ्चमावरणार्चनम् ॥

इति देव्यै पूजां समर्प्य योन्या प्रणमेत । इति पञ्चमावरणम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## अथ षष्ठावरणार्चनम् ।

| | |
|---|---|
| ३ मं सर्वज्ञा० | ३ शं सर्वाधारस्वरूपा० |
| ३ यं सर्वशक्ति० | ३ षं सर्वपापहरा० |
| ३ रं सर्वैश्वर्यप्रदा० | ३ सं सर्वानन्दमयी० |
| ३ लं सर्वज्ञानमयी० | ३ हं सर्वरक्षास्वरूपिणी० |
| ३ वं सर्वव्याधिविनाशिनी० | ३ क्षं सर्वेप्सितफलप्रदा० |

एता निगर्भयोगिन्यः सर्वरक्षाकरे चक्रे समुद्राः इत्यादि प्राग्वत्, सर्वज्ञायाः पुरतः ।

ऐं ह्रीं श्रीं ह्रीं क्लीं ब्लें त्रिपुरमालिनीचक्रेश्वरीश्रीपादुकां पूजयामि तर्पयामि नमः। क्रों सर्वमहाङ्कुशमुद्रां प्रदर्श्य गन्धं पुष्पं धूपं दीपं नैवेद्यं च दत्वा।

अभीष्टसिद्धिं मे देहि शरणागतवत्सले ।
भक्त्या समर्पये तुभ्यं षष्ठमावरणार्चनम् ॥

इति देव्यै पूजां समर्प्य । योन्या प्रणमेत् । इति षष्ठावरणम् ।

## अथ सप्तमावरणार्चनम् ।

अथाष्टारे देव्यग्रकोणाधः प्रादक्षिण्येन—

| | |
|---|---|
| ३ अं आ १४ब्लूं वशिनीवाग्देवता० | ३ तं ४ ज्म्रीं अरुणा ,, ० |
| ३ कं ४ कलह्रीं कामेश्वरी ,, ० | ३ पं ४ हस्ल्व्यूं जयिनी ,, ० |
| ३ चं ४ न्ब्लीं मोदिनी ,, ० | ३ यं ३ झम्र्यूं सर्वेश्वरी ,, ० |
| ३ टं ४ य्लूं विमला ,, ० | ३ शं ६ क्ष्म्रीं कौलिनी ,, ० |

एताः रहस्ययोगिन्यः सर्वरोगहरे चक्रे समुद्रा इत्यादिपूर्ववत् । वशिन्याः पुरतः ऐं ह्रीं श्रीं ह्रीं श्रीं सौः त्रिपुरासिद्धाचक्रेश्वरी श्रीपादुकां पूजयामि तर्पयामि नमः। ह्स्ख्फ्रें इति सर्वखेचरी मुद्रां प्रदर्श्य ।

गन्धं पुष्पं धूपं दीपं नैवेद्यं दत्वा—

अभीष्टसिद्धिं मे देहि शरणागतवत्सले ।
भक्त्या समर्पये तुभ्यं सप्तमावरणार्चनम् ॥

इति देव्यै पूजां समर्प्य योन्या प्रणमेत् । इति सप्तमावरणम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## अथाष्टमावरणार्चनम् ।

महात्र्यस्रस्य बाह्यतः पश्चिमादिदिक्षु प्रादक्षिण्येन—

३ यां रां लां वां शां द्रां द्रीं क्लीं ब्लूं सः सर्वजृम्भणेभ्यो बाणेभ्यो नमः । कामेश्वरीकामेश्वरबाणशक्ति० ।

३ थं धं सर्वसंमोहनाय धनुषे नमः । कामेश्वरीकामेश्वर धनुः शक्ति०।

३ आं ह्रीं सर्ववशीकरणाय पाशाय नमः । कामेश्वरीकामेश्वर-पाशशक्ति० ।

३ क्रों सर्वस्तम्भनाय अङ्कुशाय नमः । कामेश्वरीकामेश्वर अङ्कुशशक्ति० । इति आयुधार्चनम् ।

अथ त्रिकोणे अग्रदक्षवामकोणेषु त्रिन्दौ च क्रमेण—

| | |
|---|---|
| ३ मूलं प्रथमकूटं महाकामेश्वरी० | ३ मूलं तृतीयकूटं महभगमालिनी० |
| ३ मूलं द्वितीयकूटं महावज्रेश्वरी | ३ समग्रमूलं श्रीललिताम्बा० |

एता अतिरहस्ययोगिन्यः सर्वसिद्धिप्रदे चक्रे समुद्राः इत्यादि प्राग्वदुक्त्वा कामेश्वर्यग्रे—

३ ह्स्रैं ह्स्क्लीं ह्स्रौः त्रिपुराम्बाचक्रेश्वरी श्रीपादुकां०।

३ हसौः इति सर्वबीजमुद्रां विनिर्दिशेत् । गन्ध पुष्पं धूपं दीपं नैवेद्यं च दत्वा—

अभीष्टसिद्धिं मे देहि शरणागतवत्सले ।
भक्त्या समर्पये तुभ्यं अष्टमावरणार्चनम ॥

इति देव्यै पूजां समर्प्य योन्या प्रणमेत् । इति अष्टमावरणम् ।

## अथ नवमावरणार्चनम् ।

अथ बिन्दुभिन्ने परब्रह्मात्मके बिन्दुचक्रे मूलं महात्रिपुरसुन्दरी०। इति देवीं पूजयेत । एषा परापरातिरहस्ययोगिनी सर्वानन्दमये

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चक्रे समुद्राः इत्यादि प्राग्वदुक्त्वा। पुनः ऐं ह्रीं श्रीं मूलं ललिताचक्रेश्वरी श्रीपादुकां पूजयामि तर्पयामि नमः। ऐं इति योनिमुद्रां प्रदर्शयेत्। गन्धं पुष्पं धूपं दीपं नैवेद्यं च दत्त्वा—

अभीष्टसिद्धिं मे देहि शरणागतवत्सले।
भक्त्या समर्पये तुभ्यं नवमावरणार्चनम्॥

देव्यै पूजां निवेद्य योनिमुद्रया प्रणमेत्। इति नवमावरणम्। इत्यावरणपूजा।

इयं नवावरणीपूजा अत्यावश्यकी चतुराम्नायचतुःसमयदेवतानां समर्पयामि। तन्त्रान्तरोक्ता क्रियमाणा श्रेयस एव।

## अथ देव्या अर्चनम्।

### दण्डनाथानामानि।

ॐ पञ्चम्यै नमः। ॐ दण्डनाथायै नमः। ॐ संकेतायै नमः ॐ समयेश्वर्यै नमः। ॐ वाराह्यै नमः। ॐ पोत्रिण्यै नमः। ॐ शिवायै नमः। ॐ वार्ताल्यै नमः। ॐ महासेनायै नमः। ॐ आज्ञाचक्रेश्वर्यै नमः। ॐ अरिघ्न्यै नमः।

### मन्त्रिणीनामानि।

ॐ संगीतयोगिन्यै नमः
ॐ श्यामलायै नमः
ॐ श्यामायै नमः
ॐ मन्त्रिण्यै नमः
ॐ सचिवेशान्यै नमः
ॐ प्रधानेश्वर्यै नमः
ॐ शुकप्रियायै नमः
ॐ वीणावत्यै नमः
ॐ वैणिक्यै नमः
ॐ मन्त्रनायिकायै नमः
ॐ मुद्रिण्यै नमः
ॐ प्रियकप्रियायै नमः
ॐ नीपप्रियायै नमः
ॐ कदम्बेश्वर्यै नमः
ॐ कदम्बवनवासिन्यै नमः
ॐ सदामदायै नमः

---

१६. ચતુરાયતનપૂજા, પંચપંથિકાપૂજા ઇત્યાદિ પૂજાઓ પણ કરીએ તો તેનું વધુ સારું ફળ મળે છે.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ॐ सिंहासनेश्वर्यै नमः
ॐ ललितायै नमः
ॐ महाराज्ञ्यै नमः
ॐ वराङ्कुशायै नमः
ॐ चापिन्यै नमः
ॐ त्रिपुरायै नमः
ॐ महात्रिपुरसुन्दर्यै नमः
ॐ सुन्दरीचक्रनाथायै नमः
ॐ साम्राज्ञ्यै नमः
ॐ चक्रिण्यै नमः
ॐ चक्रेश्वर्यै नमः
ॐ महादेव्यै नमः
ॐ कामेश्यै नमः
ॐ परमेश्वर्यै नमः
ॐ कामराजप्रियायै नमः
ॐ कामकोटिकायै नमः
ॐ चक्रवर्तिन्यै नमः
ॐ महाविद्यायै नमः
ॐ शिवायै नमः
ॐ अनङ्गवल्लभायै नमः
ॐ सर्वपाटलायै नमः
ॐ कुलनाथायै नमः
ॐ आम्नायनाथायै नमः
ॐ सर्वाम्नायनिवासिन्यै नमः
ॐ शृंगारनायिकायै नमः

अथ यथावकाशं सहस्रनामावल्यादिनाप्यर्चनं कुर्यात्। पुनः श्रीदेव्यै पूर्ववत् धूपदीपौ दत्वा संक्षोभिण्यादिनवमुद्राः सबीजाः प्रदर्श्य मूलेन त्रिवारं सन्तर्प्य महानैवेद्यं समर्पयेत्।

यथा श्रीदेव्यग्रे चतुरस्रमण्डलं सामान्यार्घ्योदकेन विधाय तत्राधारोपरि सौवर्णादिपात्रे चषकभरितंभक्ष्यभोज्यादि षड्रसोपेतं महानैवेद्यं निधाय मूलेन त्रिःसंप्रोक्ष्य वं इति धेनुमुद्रयामृतीकृत्य मूलेन सप्तवारमभिमन्त्र्य पूर्ववत्। आपोशनं कल्पयित्वा।

ऐं ह्रीं श्रीं हेमपात्रगतं दिव्यं परमान्नं सुसंस्कृतम्।
पञ्चधा षड्रसोपेतं गृहाण परमेश्वरि॥

इति प्रार्थ्य पूर्वोक्तनैवेद्योपचारमन्त्रेण निवेद्य तत्तन्मुद्राविधानपूर्वकं पञ्चप्राणाहुतीः कल्पयेत्।

३ प्रथमखण्ड आत्मतत्त्वव्यापिनी श्रीललिता तृप्यतु।
३ द्वितीयखण्डं विद्यातत्त्वव्यापिनी श्रीललिता तृप्यतु।
३ तृतीयखण्ड शिवतत्त्वव्यापिनी श्रीललिता तृप्यतु।
३ मूल सर्वतत्त्वव्यापिनी श्रीललिता तृप्यतु।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



क्षणमवलम्ब्य श्रीदेवी भुक्तवती विभाव्य पूर्ववत् उपचार-मन्त्रैः पानीयोत्तरापोशनं करप्रक्षालनगण्डूषपाद्यादि कल्पयित्वा भोजनपात्रं नैर्ऋत्यां निरस्य अस्त्रेण स्थलं संशोध्य पुनः प्राग्वदाचमनीय कर्पूरवीटिकादिकं दत्वा निराजयेत् ।

## निराजनम् ।

सुवर्णादिभाजनलिखितकुंकुमपङ्करेखात्मकाष्टदलकर्णिकास्थापितमणिमयचषकपूरितं प्रथमं प्रज्वाल्य पुष्पाक्षतैरभ्यर्च्य उपचारमन्त्रपूर्वकं ।

अन्तस्तेजो बहिस्तेजो एकीकृत्यामितप्रभम् ।
त्रिधा देव्युपरिभ्राम्य कुलदीपं निवेदये ॥

इति चतुर्दशधा नवधा त्रिधा वा परिभ्राम्य दक्षभागे स्थापयेत् ।

## अथ पुष्पाञ्जलिः

अथाञ्जलौ पुष्पाण्यादाय मन्त्रपूर्वकं—

शिवे शिवसुशीतलामृततरङ्गगन्धोल्लसन्
नवावरणदेवते नवनवामृतस्यंदिनी ।
गुरुक्रमपुरस्कृते गुणशरीरनित्योज्ज्वले
षडंगपरिवारिते कलित एष पुष्पाञ्जलिः ॥

इति पुष्पाञ्जलिं समर्पयेत् ।

अथ कामकलात्मिकां श्रीदेवीं ध्यात्वा प्रणमेत् ।

## बलिदानम् ।

होमस्तु कृताकृतः । होमाकरणे तु बलिदानमात्रम् ।

यथा देव्याः दक्षभागे सामान्यार्घ्योदकेन त्रिकोणवृत्तचतुरस्रात्मकं मण्डलं परिकल्प्य ऐं ह्रीं श्रीं व्यापकमण्डलाय नमः इति गन्धादिभिरभ्यर्च्य अर्धभक्तभरितोदकं सक्षीरादिपात्रत्रयं तत्र विन्यस्य। ऐं ह्रीं श्रीं ॐ ह्रौं सर्वविघ्नकृद्भ्यः सर्वभूतेभ्यो हुं फट् स्वाहा ।

इति मन्त्रं त्रिः पठित्वा दक्षकरार्पितवामकरतत्त्वमुद्रोत्सृष्टसलिलं बल्युपरि दत्वा वामपार्ष्णिघातकरास्फोटौ कुर्वाणः बाणमुद्रया बलिं भूतैर्ग्राहयित्वा प्रणमेत् । इति बलिदानम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथ प्रदक्षिणां नमस्कारान् जप च कृत्वा स्तुवीत ।

## स्तोत्रम्

गणेशग्रहनक्षत्रयोगिनीराशिरूपिणीम् ।
देवीं मन्त्रमयीं नौमि मातृकां पीठरूपिणीम् ॥१॥

प्रणमामि महादेवीं मातृकां परमेश्वरीम ।
कालहल्लोहलोल्लोलकलनाशमकारिणीम ॥२॥

यदक्षरैकमात्रेऽपि ससिद्धे स्पर्धते नरः ।
रवितार्क्ष्येन्दुकन्दर्प शंकरानलविष्णुभिः ॥३॥

यदक्षरशशिज्योत्स्नामण्डितं भुवनत्रयम् ।
वन्दे सर्वेश्वरीं देवीं श्रीमहासिद्धमातृकाम् ॥४॥

यदक्षरमहासूत्रप्रोतमेतज्जगत्त्रयम ।
ब्रह्माण्डादिकटाहान्तं तां वन्दे सिद्धमातृकाम ॥५॥

यदेकादशमाधारं बीजं कोणत्रयोद्भवम् ।
ब्रह्माण्डादिकटाहान्तं जगदद्यापि दृश्यते ॥६॥

अकचादिटतोन्नद्धपयशाक्षरवर्गिणीम् ।
ज्येष्ठाङ्गबाहुहृत्पृष्ठ कटिपादनिवासिनीम् ॥७॥

तांभीकाराक्षरोद्धारां सारात्सारां परात्पराम् ।
प्रणमामि महादेवीं परमानन्दरूपिणीम् ॥८॥

अद्यापि यस्या जानन्ति न मनागपि देवताः ।
केयं कस्मात् क्व केनेति स्वरूपारूपभावना ॥९॥

वन्दे तामहमक्षय्यां क्षकाराक्षररूपणीम् ।
देवीं कुलकल्लोल्लासप्रोल्लसन्तीं परां शिवाम् ॥१०॥

वर्गानुक्रमयोगेन यस्यां मात्राष्टक स्थितम् ।
वन्दे तामष्टवर्गोत्थां महासिद्ध्यष्टकेश्वरीम् ॥११॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कामपूर्णजकाराख्यश्रीपीठान्तर्निवासिनीम् ।
चतुराज्ञाकोशमूलां नौमि श्रीत्रिपुरामहम् ॥१२॥

इतिद्वादशभिः श्लोकैः स्तवनं सर्वसिद्धिकृत् ।
देव्यास्त्वखण्डरूपायाः स्तवनं तव तथ्यतः ॥१३॥

भूमौ स्खलितपादानां भूमिरेवावलम्बनम् ।
त्वयि जातापराधानां त्वमेव शरणं शिवे ॥१४॥

अपराधसहस्राणि क्रियन्तेऽहर्निशं मया ।
दासोऽयमितिमां मत्वा क्षमस्व परमेश्वरि ॥१५॥

षडङ्गदेवता नित्या दिव्यौघादित्रयान् गुरून् ।
नमाम्यायुध देवींश्च शक्तीश्चावरणस्थिताः ॥१६॥

गुरुर्ब्रह्मा गुरुर्विष्णुः गुरुर्देवो महेश्वरः ।
गुरुःसाक्षात् परब्रह्म तस्मै श्रीगुरवे नमः ॥१७॥

बालभावानुसारेण भूयोमम विचेष्टितम् ।
मातृवात्सल्यसदृशं त्वया देवि विधीयताम ॥१८॥

दीनोऽहंपापयुक्तोऽहं दारिद्र्यैक निकेतनः ।
समुद्धर कृपासिन्धो कामान् मे सफलान् कुरु ॥१९॥

इति स्तोत्रं ।

## अथ सुवासिनीपूजा ।

अथ परदेवताप्रीतये शक्ति यजेत् । तां च यथोक्तलक्षणां सुवासिनी परकीयां स्वकीयां वा चातुवर्ण्यान्तर्गतां शुभासने उपाविशेत् सा चेद्दीक्षिता तदेव शोधनविधिः ।

ऐं ह्रीं श्रीं ऐं क्लीं सौः त्रिपुरायै नमः । इमां शक्ति पवित्रां कुरु कुरु मम शक्ति कुरु कुरु स्वाहा । इत्यभिषेकमन्त्रपूर्वकं सामान्यार्घ्य-सलिलेन त्रिः संप्रोक्ष्य ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ॐ शान्तिरस्तु शिवं चास्तु प्रणश्यत्यशुभं च यत् ।
यत एवागतं पापं तत्रैव परिगच्छतु ॥

इत्युच्चार्य तस्याः कर्णे ह्रीं जपेत् इति ।

अथ तां देवीरूपां विभाव्य—

ऐं ह्रीं श्रीं ऐं क्लीं सौः शक्त्यै अमुक कल्पयामि नमः ।

इति मन्त्रेण हरिद्राकुंकुमचन्दनपटवासःपुष्पधूपदीप-नैवेद्यताम्बूलादि दद्यात्। सति सम्भावे वस्त्राभरणानि च तस्या हस्ते पुष्पाञ्जलिं दद्यात्। साप्युत्थाय मूलेन देव्यै समर्प्य क्षीरपात्रं गृहीत्वा उपविश्य उपदिष्टक्रमेण तर्पणं विधाय पुनःवामकरे कृत्वोत्थाय होष्यामीत्यनुज्ञां प्रार्थ्य जुहुयोति दत्तानुज्ञा मूलान्ते सर्वतत्त्वं शोधयामि नमः स्वाहेति स्वीकुर्यात् । अदीक्षिता तु बालयैव ।

अथ पुनः कर्ता पूर्ववत् पात्रमादाय[१७] तस्यै दद्यात् ।
सापि तस्मै प्रतिदद्यात् ।

ऐं ह्रीं श्रीं इदं पवित्रममृतं इति मन्त्रेण साधकस्तदुरारीकृत्य शक्तिं भोजयित्वा समर्पितताम्बूले विसृजेत् । इति सुवासिनीपूजनम् ॥

## तत्त्वशोधनम् ।

अथ सन्निहिते गुरौ तं पादुकामन्त्रेणाभिपूज्य पात्राणि समर्प्य समाहूतैः शिष्यैः वृन्दात्मनावस्थितैः सामयिकैः सार्कं पाणी प्रक्षाल्य श्रीदेव्यै मूलेनोपचारमन्त्रेण च त्रिःपुष्पाञ्जलिं समर्प्य—

ऐं ह्रीं श्रीं समस्तप्रकटगुप्तगुप्ततरसम्प्रदायकुलकौलनिगर्भ-रहस्यातिरहस्ययोगिनीश्रीपादुकाभ्यो नमः ।

---

१७ વિશેષાર્ઘ પાત્રમાંથી થોડું જલ બીજા પાત્રમાંથી લઈ તે પાત્ર આપવું.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इति पुष्पाञ्जलिं दत्वा पूर्ववत् पात्रं पुनःपुनरादायाचमनोक्त मन्त्रैः तत्त्वानि शोधयेत् । यथा-ऐं ह्रीं श्री मूलं प्रथमखण्डं आत्मतत्त्वेन स्थूलदेहं परिशोधयामि । ३ मूलं द्वितीयखण्डं विद्यातत्त्वेन सूक्ष्मदेहं परिशोधयामि । ३ मूल तृतीयखण्डं शिवतत्त्वेन कारणदेहं परिशोधयामि । ३ समग्रमूलं सर्वतत्त्वेन महाकारणदेहं परिशोधयामि ।

अथ प्रथमपात्रस्वीकारे एवोत्थानं यथासंप्रदायं सर्वपात्रस्वीकारेऽपि । स्त्रीणां तूत्थापैव । अत्र गुरोस्तच्छक्तिसुतज्येष्ठकनिष्ठानां द्रव्याद्युपपादनं यथासंप्रदायं विधेयम् । इति तत्त्वशोधनम् ।

## अथ उद्वासनम् ।

सामान्यार्घ्योदकात् किञ्चिज्जलमादाय—

साधु वा साधु वा कर्म यद्यदाचरितं मया ।
तत्सर्वं कृपया देवि गृहाणाराधनं मम ॥

इति देव्या वामहस्ते समर्प्य सामयिकमात्मानं च मूलेन संप्रोक्ष्य शंखं प्रक्षाल्य निदध्यात् ।

ततो मूलेन तीर्थं निर्माल्यं स्वीकृत्य—

ज्ञानतोऽज्ञानतो वापि यन्मयाचरितं शिवे ।
तव कृत्यमिति ज्ञात्वा क्षमस्व परमेश्वरि ॥

इति क्षमाप्य सर्वासामावरणदेवतानां श्रीदेव्यङ्गे लयं विभाव्य खेचरीं बद्ध्वा उद्वास्य तेजोरूपेण परिणतां श्रीदेवीं पूर्ववत् हृदये नीत्वा तत्र च मूर्तिं पञ्चधोपचर्य पुनरात्माभिन्नं संविद्रूपेण विभावयेदित्युद्वासनम् । ततः शान्तिस्तवं पठेत् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## शान्तिस्तवः ।

संपूजकानां परिपालकानां
यतेंद्रियाणां च तपोधनानाम् ।
देशस्य राष्ट्रस्य कुलस्य राज्ञां
करोतु शान्ति भगवान् कुलेश ॥

नन्दन्तु साधककुलान्यणिमादिसिद्धाः
शापाः पतन्तु समयद्विषि योगिनीनाम् ।
सा शाम्भवी स्फुरतु कापि ममाप्यवस्था
यस्यां गुरोश्चरणपंकजमेव लभ्यम् ॥

शिवाद्यवनिपर्यन्तं ब्रह्मादिस्तम्बसंयुतम् ।
कालाग्न्यादिशिवान्तं च जगद्यज्ञेन तृप्यतु ॥

इति शान्तिश्लोकान् पठित्वा विशेषार्घ्यपात्रमामस्तकमुद्धृत्य तद् द्रव्यं पात्रान्तरेणादाय आर्द्रंज्वलतीतिमन्त्रेण आत्मकुण्डलिन्यग्नौ हुत्वा शेषं प्रियाय शिष्याय दत्वा तत्पात्रमन्यानि च चालयेदिति। ततः पात्राणि प्रक्षाल्य स्थापयेत् । मूलेन श्रीचक्रचरणोदकं शिरसि संप्रोक्ष्य प्राशयेदिति। श्रीदेव्यै पूजां समर्पयेत् । यथा—अनेन मया यथाज्ञानेन यथाशक्तिसंपादितद्रव्यैः कृतेन श्रीमहात्रिपुर-सुन्दरीपूजनकर्मणा भगवती श्रीमहात्रिपुरसुन्दरी प्रीयताम् न मम ।

इति श्रीयंत्रपूजनप्रयोगः समाप्तः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## अथ बालाविधानम् ।

अथ श्रीमान् साधको ब्राह्मे मुहूर्ते उत्थाय ब्रह्मरंध्रे श्रीगुरुं ध्यात्वा मानसैः संपूजयित्वा नमस्कुर्यात् ।

गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुर्देवो महेश्वरः ।
गुरुः साक्षात् परब्रह्म तस्मै श्रीगुरवे नमः ॥ इति ।

ततः शरीरशुद्धिं विधाय शुद्धभूमौ पद्मासनेनोपविश्य मूलाधारे महापद्मे कुण्डकुण्डे स्वयंभूलिंगव्यापिनी सुप्तभुजंगाकारां सार्धत्रिवलयां सहस्रविद्युत्कान्तिनिभां बिसतन्तुतनीयसीं कुडलिनी ध्यात्वा प्राणानायम्य ।

रं इति मंत्रेण तां सचेतनां कृत्वा हुं इति मन्त्रेण पृथिव्या सहोत्थाप्य स्वाधिष्ठानमानीय तत्रस्थजले पृथ्वीं लीनां विचिन्त्य तेन जलेन सह मणिपूरमानीय तत्रस्थतेजसि जलं लीनं विभाव्य तेन तेजसा सह अनाहतमानीय तत्रस्थवायौ तेजो लीनं विभाव्य तेन वायुना सह विशुद्धिमानीय तत्रस्थाकाशे वायुं लीनं विचिन्त्य तेनाकाशेन सहाज्ञाचक्रमानीय तत्रस्थमनस्याकाशं लीनं विभाव्य मनो नादे नादं ध्वनौ ध्वनिं प्रकृतौ समर्प्य बिन्दुरूपे परमशिवे कुण्डलिनीं हंसः इति मन्त्रेण लीनां कृत्वा तत्रस्था चन्द्रमण्डलकमलात् सृतयाऽमृतधारया षट्चक्राण्यभिषिच्य पुनरमृतलालीभूतां कुण्डलिनीं स्वस्थानमानीय यथाशक्ति मूलमीप्सितं मन्त्रं जपेत् । ॐ श्रीं ह्रीं ऐं तज्जपं तेजोमयं विभाव्य मूलाधारादिब्रह्मरध्रान्तं तेजोमयं देवीरूपं विचिन्त्य तत्र जपं समर्प्य नमस्कुर्यात् । इति प्राणायामविधिः ॥

### अन्तर्मातृकादिन्यासाः ।

यथा-आधारे लिंगनाभौ हृदयसरसिजे तालुमूले ललाटे
द्वे पत्रे षोडशारे द्विदशदशदले द्वादशार्धे चतुष्के ।
वासान्ते बालमध्ये डफकठसहिते कण्ठदेशे स्वरांश्च
हक्षौ कोदण्डमध्ये न्यसतु विमलधीर्न्याससम्पत्तिसिद्ध्यै ॥

इति अकारादिक्षकारान्तं अक्षरसंख्यां ५० संभाव्य न्यसेत् ।

For Private and Personal Use Only

## अथ करषड्ङ्गन्यासप्रकारः ।

ॐ ह्री अं कं खं गं घं ङं आं-अंगुष्ठाभ्यां नमः । इं चं छं जं झं ञं ई तर्जनीभ्यां नमः । उं टं ठं डं ढं णं ऊं मध्यमाभ्यां नमः । एं तं थं दं ध नं ऐं अनामिकाभ्यां नमः । ओं पं फं बं भं मं औं कनिष्ठिकाभ्यां नमः । अं यं रं लं वं शं सं षं ह्रीं ळं क्षं अः करतलकरपृष्ठाभ्यां नमः । एवं हृदयादि न्यासान् विधाय देवीस्तोत्रं पठत् साधकजनः ।

## अथ प्राणप्रतिष्ठा ।

यंत्रे वा मूर्तौ हृदये वा हस्तं दत्वा प्राणप्रतिष्ठां कुर्यात् । मूलं प्रागावाहिता भव । मूलं संस्थापिता भव । मूलं सन्निहिता भव । मूलं संन्निरुद्धा भव । मूलं संमुखीकृता भव । मूलं षडंगेन सकलीकृता भव । मूलं अवगुंठिता भव । मूलं अमृतीकृता भव । मूलं परभीकृता भवेति मुद्राः प्रदर्शयेत् ॥

ॐ आं ह्री क्रों यं रं लं वं शं षं सं हंसः सोऽहम् मम देव्याः वा प्राणाः इह प्राणाः । पुनस्तथैव जीव इह स्थितः । पुनः सर्वेन्द्रियाणि इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा ।
इति त्रिः पठेत् । प्रणवं षोडशवारं जपेदिति ॥

## अथ विनियोगः ।

अस्य श्रीबालामंत्रस्य दक्षिणामूर्तिऋषिः । पंक्तिच्छन्दः । बालात्रिपुरा देवता । ऐं बीजम् । क्लीं शक्तिः सौः किलकम् । ममाभिष्ट सिद्ध्यर्थे जपे विनियोगः ॥

### अथ मंत्रः ।

ॐ ऐं क्लीं सौः बालात्रिपुरायै नमः ।

### अथाङ्गन्यासः ।

नाभितः पादान्तं ऐं न्यसामि ।
नाभितो हृदयपर्यंतं क्लीं न्यसामि ।
हृदयतो मस्तकपर्यंतं सौः न्यसामि । इति अंगन्यासः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## अथ मूलमंत्रषडङ्गन्यासः ।

ऐं हृदयाय नमः । क्ली शिरसे स्वाहा । सौः शिखायै वषट् । ऐं कवचाय हुम् । क्लीं नेत्रत्रयाय वौषट् । सौः अस्त्राय फट् ।

### अथापरः षडंगन्यासः ।

सौः क्लीं ऐं हृदयाय नमः । क्लीं ऐं सौः शिरसे स्वाहा । सौः क्लीं ऐं शिखायै वषट् । सौ क्लीं ऐं कवचाय हुम् । क्लीं ऐं सौः नेत्रत्रयाय वौषट् । ॐ ऐ क्लीं सौः अस्त्राय फट् ।

### अथ ध्यानम् ।

रक्ताम्बरां चन्द्रकलावतंसां समुद्यतादित्यनिभां त्रिनेत्राम् ।
विद्याक्षमालाभयदानहस्तां ध्यायामि बालामरुणाम्बुजस्थाम् ॥

मातुलिङ्गपयोजन्महस्तां कनकसन्निभाम् ।
पद्मासनगतां बालां लक्ष्मीप्राप्तौ विचिंतयेत् ॥२॥

## शापोद्धारमंत्रः ।

ऐं ऐं सौः क्लीं क्लीं ऐं सौः क्लीं ।

## उद्दीपनम् ।

वद वद वाग्वादिनि ऐं क्लिन्नै क्लेदिनि महाक्षोभं कुरु ॐ मोक्षं कुरु । इति दशधा जप्त्वा यथाशक्ति मूलमंत्रं जपेत् । अस्य पुरश्चरणं ३ लक्षयमितम् ॥

इति बालामंत्रविधानम् ॥

★



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## अथ षोडश्युपासकानां विशेषाः ।

सामान्यार्घ्यस्थापनावसरे षडङ्गपूजनानन्तरं तत्सर्वं कूटषट्केनैव कर्तव्यम् । इति ।

षोडश्युपासकस्तु ऐं इति सर्वत्र त्रिखण्डामपि प्रदर्शयेत् ।

तत्त्वशोधनावसरे त्रयोदशबीजपुटैः तत्त्वत्रयस्य शोधनम् । समग्रेन मूलेन सर्वतत्त्वशोधनम् ।

सुवासिनीपूजायां पात्रस्वीकारावसरे चतुष्टयेन निवृत्तिः ।

अत्र बालोपास्तौ एकं पात्रं सर्वतत्त्वशोधकम् ।

पंचदश्युपासकानां पात्रत्रयेण तत्त्वत्रयशुद्धिः ।

षोडश्युपासनायां पात्रचतुष्टयेन तत्त्वत्रयशुद्धिः ।

पूर्णाभिषिक्तेन पात्रपञ्चकेन तत्त्वशुद्धिरिति ।

अत्र यथाधिकारमैच्छिकानि वा ।

गुरोस्तच्छक्तिसुतज्येष्ठकनिष्ठानां द्रव्याद्युपपादनं यथासंप्रदायं विधेयम् ।*

---

* શ્રી મહાત્રિપુરસુંદરીની ઉપાસનામાં તેનાં ત્રણ સ્વરૂપો અને ત્રણ મંત્રો ક્રમવાર ઉપાસ્ય તરીકે આવે છે. જેમકે (૧) ત્ર્યક્ષરી મંત્રથી ઉપાસના કરતા ઉપાસ્ય દેવતા. શ્રી બાલાત્રિપુરસુંદરી હોય છે, જેને સામાન્ય રીતે બાલા એમ કહે છે. (૨) પંચદશી—મહાત્રિપુરસુંદરીની ઉપાસના આવે છે પછી જેને સામાન્યતઃ પંચદશી અથવા શ્રીવિદ્યા કહે છે. આના પછી (૩) ષોડશી–મહામહાત્રિપુરસુંદરીની ઉપાસનાનો સાધકને આદેશ મળે છે અને ગુરુકૃપાથી પૂર્ણાભિષેક દિક્ષા પછી સાધકને સર્વમંત્રોમાં અધિકાર પ્રાપ્ત થાય છે આ છેલ્લી દિક્ષા છે.

આમ ઉપાસના ભેદથી તેની ઉપાસના કરતા જે કંઈ વિશેષતા છે તે સંબંધી અહીં જરૂરી વિશેષતા બતાવી છે.

વિશેષ જ્ઞાન શાસ્ત્રોના અભ્યાસ અને ગુરુ પરંપરાને (સંપ્રદાયને) આધારે મેળવવાનું રહે છે.

સાધકે સાધનાની મહત્તા અને ઉપાસ્ય દેવતાનું સર્વાધિક્યપણું માનવાનું રહે છે.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# देवीमानसपूजा ।

## श्रीमंत्रमातृकापुष्पमाला ।

कल्लोलोल्लसितामृताब्धिलहरीमध्ये विराजन्मणि-
द्वीपे कल्पकवाटिकापरिवृते कादम्बवाट्युज्ज्वले ।
रत्नस्तम्भसहस्रनिर्मितसभामध्ये विमानोत्तमे
चिन्तारत्नविनिर्मितं जननि ते सिंहासनं भावये ॥१॥

एणाङ्कानलभानुमण्डललसच्छ्रीचक्रमध्ये स्थितां
बालार्कद्युतिभासुरां करतलैः पाशाङ्कुशौ बिभ्रतीम् ।
चापं बाणमपि प्रसन्नवदनां कौसुम्भवस्त्रान्वितां
तां त्वां चन्द्रकलावतंसमुकुटां चारुस्मितां भावये ॥२॥

ईशानादिपदं शिवैकफलकं रत्नासनं ते शुभं
पाद्यं कुंकुमचन्दनादिभरितैरर्घ्यं सरत्नाक्षतैः ।
शुद्धैराचमनीयकं तव जलैर्भक्त्या मया कल्पितं
कारुण्यामृतवारिधे तदखिलं सन्तुष्टये कल्पताम् ॥३॥

लक्ष्ये योगिजनस्य रक्षितजगज्जाले विशालेक्षणे
प्रालेयाम्बुपटीरकुंकुमलसत्कर्पूरमिश्रोदकैः ।
गोक्षीरैरपि नारिकेलसलिलैः शुद्धोदकैर्मन्त्रितैः
स्नानं देवि धिया मयैतदखिलं सन्तुष्टये कल्पताम् ॥४॥

ह्रींकाराङ्कितमन्त्रलक्षिततनो हेमाचलात्संचितैः
रत्नैरुज्ज्वलमुत्तरीयसहितं कौसुम्भवर्णांशुकम् ।
मुक्तासन्ततियज्ञसूत्रममलं सौवर्णतन्तूद्भवं
दत्तं देवि धिया मयैतदखिलं सन्तुष्टये कल्पताम् ॥५॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



हंसैरप्यतिलोभनीयगमने हारावलीमुज्ज्वलां
हिन्दोलद्युतिहीरपूरिततरे हेमाङ्गदे कङ्कणे ।
मञ्जीरौ मणिकुण्डले मुकुटमप्यर्धेन्दुचूडामणिं
नासामौक्तिकमङ्गुलीयकटकौ काञ्चीमपि स्वीकुरु ॥६॥

सर्वाङ्गे घनसारकुंकुमघनश्रीगन्धपङ्काङ्कितं
कस्तूरीतिलकं च भालफलके गोरोचनापत्रकम् ।
गण्डादर्शनमण्डले नयनयोर्दिव्याञ्जनं तेऽञ्चितं
कण्ठाब्जे मृगनाभिपङ्कममलं त्वत्प्रीतये कल्पताम् ॥७॥

कल्हारोत्पलमल्लिकाकुरवकैः सौवर्णपंकेरुहैं-
र्जातीचम्पकमालतीबकुलकैर्मन्दारकुन्दादिभिः ।
केतक्या करवीरकैर्बहुविधैः क्लृप्ताः स्रजो मालिका
संकल्पेन समर्पयामि वरदे सन्तुष्टये गृह्यताम् ॥८॥

हन्तारं मदनस्य नन्दयसि यैरङ्गैरनङ्गोज्ज्वलै-
र्यैर्भृङ्गावालनीलकुन्तलभरैर्बध्नासि तस्याशयम् ।
तानीमानि तवाम्ब कोमलतराण्यामोदलीलागृहा-
ण्यामोदाय दशाङ्गगुग्गुलघृतधूपैरहं धूपये ॥९॥

लक्ष्मीमुज्ज्वलयामि रत्ननिवहोद्भास्वत्तरे मन्दिरे
मालारूपविलम्बितैर्मणिमयस्तम्भेषु संभावितैः ।
चित्रैर्हाटकपुत्रिकाकरधृतैर्गव्यैर्घृतैर्वर्धितै
र्दिव्यैर्दीपगणैर्धिया गिरिसुते संतुष्टये कल्पताम ॥१०॥

ह्रींकारेश्वरि तप्तहाटककृतैः स्थालीसहस्रैर्भृतं
दिव्यान्नं घृतसूपशाकभरितं चित्रान्नभेदं तथा ।
दुग्धान्नं मधुशर्करादधियुतं माणिक्यपात्रे स्थितं
माषापूपसहस्रमम्ब सफलं नैवेद्यमावेदये ॥११॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सच्छायैर्वरकेतकीदलरुचा ताम्बूलवल्लीदलैः
पूगैर्भूरिगुणैः सुगन्धिमधुरैः कर्पूरखण्डोज्ज्वलैः ।
मुक्ताचूर्णविराजितैर्बहुविधैर्वक्त्राम्बुजामोदनैः
पूर्णा रत्नकलाचिका तव मुदे न्यस्ता पुरस्तादुमे ॥१२॥

कन्याभिः कमनीयकान्तिभिरलंकारामलारार्तिका—
पात्रे मौक्तिकचित्रपङ्क्तिविलसत्कर्पूरदीपालिभिः ।
तत्तत्तालमृदङ्गगीतसहितं नृत्यत्पदाम्भोरुहं
मन्त्राराधनपूर्वकं सुविहितं नीराजनं गृह्यताम् ॥१३॥

लक्ष्मीमौक्तिकलक्षकल्पितसितच्छत्रं तु धत्ते रसा-
दिन्द्राणी च रतिश्च चामरवरे धत्ते स्वयं भारती ।
वीणामेणविलोचनाः सुमनसां नृत्यन्ति तद्रागव-
द्भावैराङ्गिकसात्त्विकैः स्फुटरसं मातस्तदालोक्यताम् ॥१४

ह्रींकारत्रयसंपुटेन मनुनोपास्ये त्रयीमौलिभि—
र्वाक्यैर्लक्ष्यतनोस्तव स्तुतिविधौ को वा क्षमेताम्बिके ।
संलापाः स्तुतयः प्रदक्षिणशतं संचार एवास्तु ते
संवेशो नमसः सहस्रमखिलं त्वत्प्रीतये कल्पताम् ॥१५

श्रीमन्त्राक्षरमालया गिरिसुतां यः पूजयेच्चेतसा
सन्ध्यासु प्रतिवासरं सुनियतस्तस्यामलं स्यान्मनः ।
चित्ताम्भोरुहमण्डपे गिरिसुता नृत्तं विधत्ते रसा—
द्वाणी वक्त्रसरोरुहे जलधिजा गेहे जगन्मङ्गला ॥१६॥

इति गिरिवरपुत्रीपादराजीवभूषा
भुवनममलयन्ती सूक्तिसौरभ्यसारैः ।
शिवपदमकरन्दस्यन्दिनीयं निबद्धा
मदयतु कविभृङ्गान्मातृकापुष्पमाला ॥१७॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमदाद्यशंकर
भगवत्पादाचार्यवर्यप्रणीता श्रीमंत्रमातृकापुष्पमाला सम्पूर्णा ॥ ॐ

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## अथ खड्गमालामन्त्रः ।

अस्य श्रीखड्गमालामन्त्रस्य, उपस्थाधिष्ठायी वरुणादित्य-ऋषये नमः शिरसे, गायत्रीछन्दसे नमः मुखे, ललितादेवतायै नमः हृदये, कएईलह्रीं बीजाय नमः गुह्ये, हसकहलह्रीं शक्तये नमः पादयोः, सकलह्रीं कीलकाय नमः नभौ, श्रीललितादेवताप्रसादसिद्ध्यर्थे पाठे विनियोगाय नमः सर्वांगे । कूटत्रयद्विरावृत्या करषडंगन्यासौ ।

### ध्यानम्

पद्मरागप्रतीकाशां त्रिनेत्रां चन्द्रशेखराम् ।
नवरत्नलसद्भूषा भूषितापादमस्तकाम् ॥१॥
पाशाङ्कुशौ पुष्पशरान् दधती पुण्ड्रचापकम् ।
पूर्णतारुण्यलावण्यतराङ्गितकलेवराम् ॥
स्वसमानाकारवेषकामेशाश्लेषसुन्दराम् ।२॥

इति ध्यात्वा मानसैः सम्पूज्य ।

ॐ ऐं ह्रीं श्रीं ॐ नमस्त्रिपुरसुन्दरि हृदयदेवि शिरोदेवि शिखादेवि कवचदेवि नेत्रदेव्यस्त्रदेवि कामेश्वरि भगमालिनि नित्य-क्लिन्ने भेरुण्डेवह्निवासिनि महावज्रेश्वरि शिवदूति त्वरिते कुलसुन्दरि नित्ये नीलपताके विजये सर्वमङ्गले ज्वालामालिनि चित्रे महानित्ये परमेश्वरपरमेश्वरि मित्रीशमयि षष्ठीशमय्युड्डीशमयि चर्यानाथमयि लोपामुद्रामय्यगस्तमयि कालतापनमयि धर्माचार्यमयि मुक्तकेशी-श्वरमयि दीपकलानाथमयि विष्णुदेवमयि प्रभाकरदेवमयि तेजोदेवमयि मनोजदेवमयि कल्याणदेवमयि रत्नदेवमयि वासुदेवमयि श्रीरामा-नन्दमय्याणिमासिद्धे लघिमासिद्धे महिमासिद्धे ईशित्वसिद्धे वशित्व-सिध्धे प्राकाम्यसिध्धे भुक्तिसिध्धे इच्छासिध्धे प्राप्तिसिध्धे सर्वकाम सिद्धे ब्राह्मि माहेश्वरि कौमारि वैष्णवि वाराहि माहेन्द्रि चामुण्डे महालक्ष्मी सर्वसंक्षोभिणि सर्वविद्राविणि सर्वाकर्षिणि सर्वावशङ्करि

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सर्वोन्मादिनि सर्वमहाङ्कुशे सर्वखेचरि सर्वबीजे सर्वयोने सर्व-त्रिखण्डे त्रैलोक्यमोहनचक्रस्वामिनि प्रकटयोगिनि कामाकर्षिणि बुध्या कर्षिण्यहङ्काराकर्षिणि शब्दाकर्षिणि स्पर्शाकर्षिणि रूपाकर्षिणि रसाकर्षिणि गन्धाकर्षिणि चित्ताकर्षिणि धैर्याकर्षिणि स्मृत्याकर्षिणि नामाकर्षिणि बीजा कर्षिण्यात्माकर्षिण्यमृताकर्षिणि शरीरकर्षिणिसर्वाशापरिपूरकचक्रस्वामिनि गुप्तयोगिन्यनङ्गकुसुमेऽनङ्गमेखलेऽनङ्गमदनेऽनङ्गमदनातुरेऽनङ्गरे-खेऽनङ्गवेगिन्यनङ्गाकुशेऽनङ्गमालिनि सर्वसंक्षोभणषचक्रस्वामिनि गुप्ततरयोगिनि सर्वसंक्षोभिणि सर्वविद्राविणि सर्वाकर्षिणि सर्वाह्ला-दिनि सर्वसंमोहिनि सर्वस्तम्भिनि सर्वजृम्भिणि सर्ववशङ्करि सर्वरञ्जिनि सर्वोन्मादिनि सर्वार्थसाधिनि सर्वसम्पत्तिपूरणि सर्व-मन्त्रमयि सर्वद्वन्द्वक्षयङ्करि सर्वसौभाग्यदायकचक्रस्वामिनि सम्प्रदाय योगिनि सर्वसिद्धिप्रदे सर्वसम्पत्प्रदे सर्वप्रियङ्करि सर्वमङ्गलकारिणि सर्वकामप्रदे सर्वदुखविमोचिनि सर्वमृत्युप्रशमनि सर्वविघ्ननिवारिणि सर्वाङ्गसुन्दरि सर्वसौभाग्यदायिनि सर्वार्थसाधकचक्रस्वामिनि कुलो-त्तीर्णयोगिनि सर्वज्ञे सर्वशक्ते सर्वैश्वर्यप्रदे सर्वज्ञानमयि सर्व-व्याधिविनाशिनि सर्वाधारस्वरूपे सर्वपापहरे सर्वानन्दमयि सर्व रक्षास्वरूपिणि सर्वेप्सितप्रदे सर्वरक्षाकरचक्रस्वामिनि निगर्भयोगिनि वशिनि कामेश्वरि मोदिनि विमलेऽरुणे जयिनि सर्वेश्वरि कौलिनि सर्व-रोगहरचक्रस्वामिनि रहस्ययोगिनि बाणिनि चापिनि पाशिन्यङ्कुशिनि महाकामेश्वरि महावज्रेश्वरि महाभगमालिनि महाश्रीसुन्दरि सर्वसिद्धि प्रदचक्रस्वामिन्यतिरहस्ययोगिनि श्रीश्रीमहाभट्टारिके सर्वानन्दमय-चक्रस्वामिनि परापररहस्ययोगिनि त्रिपुरेत्रिपुरेशि त्रिपुरसुन्दरि त्रिपुरवासिनि त्रिपुराश्रीस्त्रिपुरमालिनि त्रिपुरासिद्धे त्रिपुराम्बे महा-त्रिपुरसुन्दरि महामहेश्वरि महामहाराज्ञि महामहाशक्ते महामहागुप्ते महामहाज्ञप्ते महामहानन्दे महामहास्पन्दे महामहाशये महामहा-श्रीचक्र नगरसाम्राज्ञि नमस्ते नमस्ते स्वाहा ।

श्रीं ह्रीं ऐं ॐश्रो परदेवतार्पणमस्तु ॥ इति खड्गमालामन्त्र समाप्तः १

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## अथ नमोऽन्तशक्तिमालामंत्रनामावलिः ॥

॥संकल्पः॥ अद्येत्यादि० मम श्रीराजराजेश्वरीमहात्रिपुरसुंदरी-देवताप्रसादसिद्धिद्वारा सर्वाभीष्टसिद्ध्यर्थं शक्तिमालामंत्रनामभिः अमुकद्रव्यसमर्पणं करिष्ये ।

अस्य श्रीनमोऽन्तशक्तिमालामंत्रस्य । पूर्ववत् ऋष्यादिन्यासान्विधाय करषडंगं कृत्वा अरुणां करुणेति ध्यात्वा मानसोपचारैः संपूज्य योनिमुद्रया प्रणम्य नामानि पठेत् ॥

ऐं ह्रीं श्रीं नमस्त्रिपुर सुंदर्यै नमः ।

३ हृदयदेव्यै नमः ।
३ शिरोदेव्यै ,, ।
३ शिखादेव्यै ,, ।
३ कवचदेव्यै ,, ।
३ नेत्रदेव्यै ,, ।
३ अस्त्रदेव्यै ,, ।
३ कामेश्वर्यै ,, ।
३ भगमालिन्यै ,, ।
३ नित्यक्लिन्नायै ,, ।
३ भेरुंडायै ,, ।
३ वह्निवासिन्यै ,, ।
३ महावज्रेश्वर्यै ,, ।
३ शिवदूत्यै ,, ।
३ त्वरितायै ,, ।
३ कुलसुंदर्यै ,, ।
३ नित्यायै ,, ।
३ नीलपताकायै ,, ।
३ विजयायै ,, ।
३ सर्वमंगलायै ,, ।
३ ज्वालामालिन्यै ,, ।
३ चित्रायै ,, ।
३ महानित्यायै ,, ।
३ परमेश्वरपरमेश्वर्यै ,, ।
३ मित्रीशमय्यै ,, ।
३ षष्ठीशमय्यै ,, ।
३ उड्डीशमय्यै ,, ।
३ चर्यानाथमय्यै ,, ।
३ लोपामुद्रामय्यै ,, ।
३ अगस्त्यमय्यै ,, ।
३ कालतापनमय्यै ,, ।
३ धर्माचार्यमय्यै ,, ।
३ मुक्तकेशीश्वरमय्यै ,, ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



३ दीपकलानाथमय्यै ,, ।
३ विष्णुदेवमय्यै ,, ।
३ प्रभाकरदेवमय्यै ,, ।
३ तेजोदेवमय्यै ,, ।
३ मनोजदेवमय्यै ,, ।
३ कल्याणदेवमय्यै ,, ।
३ रत्नदेवमय्य ,, ।
३ वासुदेवमय्यै ,, ।
३ श्रीरामानंदमय्यै ,, ।
३ अणिमासिद्ध्यै ,, ।
३ लघिमासिद्ध्यै ,, ।
३ महिमासिद्ध्यै ,, ।
३ ईशित्वसिद्ध्यै ,, ।
३ वशित्वसिद्ध्यै ,, ।
३ प्राकाम्यसिद्ध्यै ,, ।
३ मुक्तिसिद्ध्यै ,, ।
३ ईच्छासिद्ध्यै ,, ।
३ प्राप्तिसिद्ध्यै ,, ।
३ सर्वकामसिद्ध्यै ,, ।
३ ब्राह्मै ,, ।
३ माहेश्वर्यै ,, ।
३ कौमार्यै ,, ।
३ वैष्णव्यै ,, ।
३ वाराह्यै ,, ।
३ माहेन्द्रै ,, ।
३ चामुण्डायै ,, ।
३ महालक्ष्म्यै ,, ।

३ सर्वसंक्षोभिण्यै ,, ।
३ सर्वविद्राविण्यै ,, ।
३ सर्वाकर्षिण्यै ,, ।
३ सर्ववशंकर्यै ,, ।
३ सर्वोन्मादिन्यै ,, ।
३ सर्वमहांकुशायै ,, ।
३ सर्वखेचर्यै ,, ।
३ सर्वबीजायै ,, ।
३ सर्वयोन्यै ,, ।
३ सर्वत्रखंडायै ,, ।
३ त्रैलोक्यमोहनचक्र
स्वामिन्यै ,, ।
३ प्रकटयोगिन्यै ,, ।
३ कामाकर्षिण्यै ,, ।
३ बुद्ध्याकर्षिण्यै ,, ।
३ अहंकाराकर्षिण्यै ,, ।
३ शब्दाकर्षिण्यै ,, ।
३ स्पर्शाकर्षिण्यै ,, ।
३ रूपाकर्षिण्यै ।
३ रसाकर्षिण्यै ,, ।
३ गंधाकर्षिण्यै ,, ।
३ चित्ताकर्षिण्यै ,, ।
३ धैर्याकर्षिण्यै ,, ।
३ स्मृत्याकर्षिण्यै ,, ।
३ नामाकर्षिण्यै ,, ।
३ बीजाकर्षिण्य ,, ।
३ आत्माकर्षिण्यै ,, ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



३ अमृताकर्षिण्यै ,, ।
३ शरीराकर्षिण्यै ,, ।
३ सर्वाशापारपूरकचक्र-
स्वामिन्यै ,, ।
३ गुप्तयोगिन्यै ,, ।
३ अनंगकुसुमायै ,, ।
३ अनंगमेखलायै ,, ।
३ अनंगमदनायै ,, ।
३ अनंगमदनातुरायै ,, ।
३ अनंगरेखायै ,, ।
३ अनंगवेगिन्यै ,, ।
३ अनंगाङ्कुशायै ,, ।
३ अनंगमालिन्यै ,, ।
३ सर्वसंक्षोभणचक्र-
स्वामिन्यै ,, ।
३ गुप्ततरयोगिन्यै ,, ।
३ सर्वसंक्षोभिण्यै ,, ।
३ सर्वविद्राविण्यै ,, ।
३ सर्वाकर्षिण्यै ,, ।
सर्वाह्लादिन्यै ,, ।
३ सर्वसंमोहिन्यै ,, ।
३ सर्वस्तंभिन्यै ,, ।
३ सर्वजृंभिण्यै ,, ।
३ सर्ववशंकर्यै ,, ।
३ सर्वरंजिन्यै ,, ।
३ सर्वोन्मादिन्यै ,, ।
३ सर्वार्थसाधिन्यै ,, ।

३ सर्वसंपत्तिपूरिण्यै ,, ।
३ सर्वमंत्रमय्यै ,, ।
३ सर्वद्वंद्वक्षयंकर्यै ,, ।
३ सर्वसौभाग्यदायक
चक्रस्वामिन्यै ,, ।
३ संप्रदाययोगिन्यै ,, ।
३ सर्वसिद्धिप्रदायै ,, ।
३ सर्वसंपत्प्रदायै ,, ।
३ सर्वप्रियंकर्यै ,, ।
३ सर्वमंगलकारिण्यै ,, ।
३ सर्वकामप्रदायै ,, ।
३ सर्वदुःखविमोचिन्यै ,, ।
३ सर्वमृत्युप्रशमन्यै ,, ।
३ सर्वविघ्ननिवारिण्यै ,, ।
३ सर्वाङ्गसुंदर्यै ,, ।
३ सर्वसौभाग्यदायिन्यै ,, ।
३ सर्वार्थसाधकचक्र-
स्वामिन्यै ,, ।
३ कुलोत्तीर्णयोगिन्यै ,, ।
३ सर्वज्ञायै ,, ।
३ सर्वशक्त्यै ,, ।
३ सर्वैश्वर्यप्रदायै ,, ।
३ सर्वज्ञानमय्यै ,, ।
३ सर्वव्याधिविनाशिन्यै ,, ।
३ सर्वाधारस्वरूपायै ,, ।
३ सर्वपापहरायै ,, ।
३ सर्वानंदमय्यै ,, ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



३ सर्वेप्सितप्रदायै ,, ।
३ सर्वरक्षास्वरूपिण्यै ,, ।
३ सर्वरक्षाकरचक्र
स्वामिन्यै ,, ।
३ निगर्भयोगिन्यै ,, ।
३ वशिन्यै ,, ।
३ कामेश्वर्यै ,, ।
३ मोदिन्यै ,, ।
३ विमलायै ,, ।
३ अरुणायै ,, ।
३ जयिन्यै ,, ।
३ सर्वेश्वर्यै ,, ।
३ कौलिन्यै ,, ।
३ सर्वरोगहरचक्र-
स्वामिन्यै ,, ।
३ रहस्ययोगिन्यै ,, ।
३ बाणिन्यै ,, ।
३ चापिन्यै ,, ।
३ पाशिन्यै ,, ।
३ अंकुशिन्यै ,, ।
३ महाकामेश्वर्यै ,, ।
३ महावज्रेश्वर्यै ,, ।
३ महाभगमालिन्यै ,, ।
३ महाश्रीसुंदर्यै ,, ।
३ सर्वसिद्धिप्रदचक्र
स्वामिन्यै

३ अतिरहस्ययोगिन्यै ,, ।
३ श्रीमहाभट्टारिकायै ,, ।
३ सर्वानंदमयचक्र
स्वामिन्यै ,, ।
३ परापररहस्य
योगिन्य ,,
३ त्रिपुरायै ,, ।
३ त्रिपुरेश्यै ,, ।
३ त्रिपुरसुंदर्यै ,, ।
३ त्रिपुरवासिन्ये ,, ।
३ त्रिपुराश्रीयै ,, ।
३ त्रिपुरमालिन्यै ,, ।
३ त्रिपुरासिद्धयै ,, ।
३ त्रिपुरांबाय ,, ।
३ महात्रिपुरसुंदर्यै ,, ।
३ महामहेश्वर्यै ,, ।
३ महामहाराज्ञ्ये ,, ।
३ महामहाशक्त्यै ,, ।
३ महामहागुप्ताय ,, ।
३ महामहासप्तायै ,, ।
३ महामहानंदायै ,, ।
३ महामहास्पंदायै ,, ।
३ महामहाशयाय ,, ।
३ महामहाश्रीचक्र
नगर साम्राज्य ,, ।
३ नमस्तेनमस्ते स्वाहा ,, ।

इति खड्गमालानामानि ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## "अथ श्रीसौभाग्याष्टेत्तरशतनामस्तोत्रम्" ।

"संकल्पः" अद्येत्यादि मम श्री राजराजेश्वरी महात्रिपुरसुंदरी देवताप्रसादसिद्धिद्वारा सर्वाभीष्टसिद्ध्यर्थं श्रीसौभाग्याष्टोत्तर शतनामस्तोत्रपाठाख्यं कर्म करिष्ये ॥

अस्य श्रीसौभाग्याष्टोत्तरशतनाम स्तोत्रमंत्रस्य आनंदभैरव-ऋषिः । अनुष्टुप्छंदः । श्री महात्रिपुरसुंदरी देवता । ऐं बीजं । सौःशक्तिः । क्लीं कीलकंम् । श्री महात्रिपुरसुंदरी प्रसादसिद्ध्यर्थें पाठेविनियोगः ॥ ऋष्यादिन्विन्यस्य ॥ मूलेन द्विरावृत्या करषडंगं विधाय ध्यायेत् । यथा—

आनंदभैरवऋषेय नमः शिरसि नम अनुष्टुपछंद से मुखे । श्री महात्रिपुरसुंदरी देवतायै नमः हृदये । ऐं बीजाय नमः गुह्ये । सौः शक्तये नमः पादयोः । क्लीं कीलकाय नमः नाभौ । मम श्री महात्रिपुरसुंदरीप्रसादसिध्यर्थे पाठे विनियोगाय नमः सर्वांगे । कूटत्रयेण द्विरावृत्या करषडंगौ ॥

### ॥ ध्यानम् ॥

बालार्कमंडलाभासां चतुर्बाहुं त्रिलोचनाम् ।
पाशांकुशधनुर्बाणा धारयंती शिवां भजे ॥
इति ध्यात्वा मानसैः संपूज्य योनिमुद्रया प्रणमेत् ।

## ॥ अथ नमोन्तसौभाग्याष्टोत्तरशतनामावलि ॥

॥ संकल्पः ॥ अद्येत्यादि० मम श्रीराजराजेश्वरीमहात्रिपुरसुंदरीदेवता सिद्धिद्वारा सर्वाभीष्टसिद्ध्यर्थं सौभाग्याष्टोत्तरशतनामभिः अमुक-द्रव्यसमर्पण करिष्ये ।

अस्यश्री सौभाग्याष्टोत्तरशतनाम मालामंत्रस्येत्यादि पूर्ववत् ऋष्यादिन्यासान्विधाय करषडंग कृत्वा बालोर्कांतध्यात्वा मानसोपचारैः संपूज्य योनिमुद्रयाप्रणम्य नामानिपठेत् ॥

For Private and Personal Use Only

ऐं ह्रीं श्रीं ऐं क्लीं सौः

परमानंदलहरी परचेतन्यदीपिका ।
स्वयंप्रकाशकिरणा नित्यवैभवशालिनी ॥१॥

विशुद्धकेवलाखंडा सत्यकालात्मरूपिणी ।
आदिमध्यान्तरहिता महामायाविलासिनि ॥२॥

गणपात्रपारक्छेत्री सर्वतत्त्वविकासिनी ।
स्त्रीपुंसभावरसिका जगत्सर्गादिलंपटा ॥३॥

अशेषनामरूपादिभेदाभेदितविभ्रमा ।
अनादिवासनारूपा वासनोद्यत्प्रपंचिका ॥४॥

प्रपंचोपशमप्रौढा चराचरजगन्मयी ।
समस्तजगदाधारा सर्वसन्जीवनोत्सुका ॥५॥

भक्तचिन्तामयानंतविधवैभवविग्रहा ।
शृंगारादिनवप्रौढ रसानुगुण संभ्रमा ॥६॥

सर्वाकर्षणवश्यादि सर्वकर्मधुरंधरा ।
विज्ञानपरमानंदविद्या संतानसिद्धिदा ॥७॥

आयुरारोग्यसौभाग्यबलश्रीकीर्तिभाग्यदा ।
धनधान्यमणिवस्त्रभूषालेपनमाल्यदा ॥८॥

गृहग्राममहाराज्यसाम्राज्य सुखदायिनी ।
सप्तांगकुलसंपूर्णसार्वभौमपदप्रदा ॥९॥

ब्रह्माविष्णुशिवेन्द्रादिपदविभ्रालक्षणा ।
भुक्तिमुक्तिमहाभक्ति विरक्त्याद्वैतवादिनी ॥१०॥

निग्रहानुग्रहापेक्षानिर्णितश्रीपदान्विता ।
परकायप्रवेशादियोगसिद्धिप्रदायिनी ॥११॥

सृष्टसञ्जीवनप्रौढा दुष्टसंहारसिद्धिदा ।
लीलाविनिर्मितानेककोटिब्रह्मांडमंडला ॥१२॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



एकानेकात्मिका नानारूपिण्यर्द्धांगनेश्वरी ।
शिवशक्तिमयी नित्यशृंगारैकरसप्रिया ॥१३॥

तुष्टा पुष्टा परिच्छिन्ना नित्ययौवनमोहिनी ।
समस्तदेवतारूपा सर्वदेवाधिदेवता ॥१४॥

देवर्षिपितृसिद्धादियोगिनीभैरवात्मिका ।
पुत्रमित्रकलत्रादिबंधुसर्वस्वरूपिणी ॥१५॥

मंत्रस्तोत्रमहायंत्रवस्त्रादि पुष्टिकात्मिका ।
निधिसिद्धिमणिमुद्राशस्त्रास्त्रयुधभासुरा ॥१६॥

छत्रचामरवादित्रपताकाव्यजनान्विता ।
हस्त्यश्वरथपादादिमातृसेनेशसेविता ॥१७॥

पुरोहितकुलाचार्यगुरुशिष्यादिसेविता ।
सुधासमुद्रमध्योद्यत्सुरद्रुमनिवासिनी ॥१८॥

मणिद्विपांतरप्रोद्यत्कदंबवनवासिनी ।
चिन्तामणिगृहान्तस्था महामण्डल मध्यगा ॥१९॥

रत्नसिंहासनप्रोद्यत् शिवमंचाधिशायिनी ।
सदाशिवमहालिंगमूलसंपृष्टयोनिका ॥२०॥

अन्योन्यलिंगसंघर्षकंडूसंक्षुब्धमानसा ।
कलोद्यद्बिंदुकार्याद्याश्चर्यनाद परंपरा ॥२१॥

नादांतानंदसंदोहस्वयंव्यक्तवचोमृता ।
कामराजमहातंत्ररहस्याचारदक्षिणा ॥२२॥

मकारपंचकोद्भूतप्रौढांतोल्लाससुंदरी ।
श्रीचक्रराजनिलयाश्रीविद्यामंत्रविग्रहा ॥२३॥

अखंडसच्चिदानंदशिवशक्त्यैकरूपिणी ।
त्रिपुरात्रिपुरेशानीमहात्रिपुरसुंदरी ॥२४॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्रिपुरावासरसिका त्रिपुराश्रीस्वरूपिणी ।
महापद्मवनांतस्था महात्रिपुरमालिनी ॥२५॥
महात्रिपुरसिद्धांबा महाश्री त्रिपुरांबिका ।
नवचक्रमहादेवी महात्रिपुरभैरवी ॥२६॥
श्रीमाता ललिता बाला राजराजेश्वरी तथा ।
उत्पत्तिस्थितिसंहारचक्रचक्र नवासिनी ॥२७॥
भूचक्रवासरसिका मेरूचक्रनिवासिनी ।
कालचक्रभ्रमोन्नद्धज्योतिश्चक्रप्रवर्तिनी ॥२८॥
अर्द्धमेरुकचक्रस्था सर्वलोकमहेश्वरी ।
वल्मीकपूरमध्यस्था जंबूवननिवासिनी ॥२९॥
अनलाचक्रचक्रस्था व्याघ्रचक्रनिवासिनी ।
श्रीकालहस्तिनिलयाकाशोपुरनिवासिनी ॥३०॥
श्रमत्कैलासनिलयाद्वादशांतमहेश्वरी ।
श्रीषोडशांतमध्यस्था सर्ववेदान्तलक्षिता ॥३१॥
श्रुतिस्मृतिपुराणेतिहासागमकुलेश्वरी ।
भूतभौक्तितंन्मात्रदेवता प्राणहृन्मयी ॥३२॥
जीवेश्वरब्रह्मरूपा त्रिगुणाढया गुणात्मिका ।
अवस्थात्रयनिर्मुला वाग्रमोमा थहेश्वरी ॥३३॥
गायत्री भूवनेशानी दुर्गा काल्यादिरूपिणी ।
मत्स्यकूर्मवराहादिनानोवेशविलासिनी ॥३४॥
महायोगीश्वराराध्या महावीरवरप्रदा ।
सिद्धेश्वरकुलाराध्यश्रीमच्चारणभैरवा
मौः क्लीं ऐं श्रीं ह्रीं हें ॥३५॥

इति श्रीरूद्रयामले सौभाग्याष्टोत्तर नाम स्तोत्रम् ॥

अनेन श्रीसौभाग्याष्टोत्तरशतनामस्तोत्रजपाखेन कर्मणत भगवती श्रीराजराजेश्वरी महात्रिपुरसुंदरीदेवता तृप्रीयताम् ॥ ॐ तत्स ॥

For Private and Personal Use Only

हिं ह्रीं श्रीं ऐं क्लीं सौः परमानंदलहर्यै नमः ।

„ परचैतन्यदीपिकायै „ ।
„ स्वयंप्रकाशाकिरणायै „ ।
„ नित्यवैभवशालिन्यै „ ।
„ विशुद्धकेवलाखंडायै „ ।
„ सत्यकालात्मरूपिण्यै „ ।
„ आदिमध्यान्तरहितायै „ ।
„ महामायाविलासिन्यै „ ।
„ गणपात्रपरिच्छेद्यै „ ।
„ सर्वतत्त्वविकामिन्यै [१०] „ ।
„ स्त्रापुसभावरसिकयै „ ।

„ जगत्सर्गादिलंपटायै „ ।
„ अशेषनामरूपादिभेदा
भेदितविभ्रमायै „ ।
„ अनादिवासनारूपायै „ ।
„ वासनोद्यत्प्रपंचकायै „ ।
„ प्रपंचोपशमप्रौढायै
„ चराचरजगन्मय्यै „ ।
„ समस्तजगदाधारायै „ ।
„ सर्वसंजीवनोत्सुकायै „ ।

„ यक्षचिन्तामयानंतविधवैभवविग्रहायै [२०] „ ।
„ शृंगारादिनवप्रौढारसानुगुण संभ्रमायै „ ।
„ सर्वाकर्षणवश्यादिसर्वकर्मधुरंधरायै „ ।
„ विज्ञानपरमानंदविद्यासंतानसिद्धिदायै „ ।
„ आयुरारोग्यसौभाग्यबलश्रीकीर्तिभाग्यदायै „ ।
„ धनधान्यमणिवस्त्रभूषालेपनमाल्यदायै „ ।
„ गृहग्राममहाराज्यसाम्राज्यसुखदायिन्यै „ ।
„ सप्तांगकुलसंपूर्णसार्वभौमपदप्रदायै „ ।
„ ब्रह्मविष्णुशिवेन्द्रादिपदविभ्रमलक्षणायै „ ।
„ भुक्तिमुक्तिमहाभक्तिविरक्त्याद्वैतवादिन्यै „ ।
„ निगृहानुगृहापेक्षानिर्णितश्रीप्रदान्वितायै [३०] „ ।
„ परकायप्रवेशादियोगसिद्धिप्रदायिन्यै „ ।
„ शिष्टसञ्जीवनप्रौढायै „ ।
„ दुष्टसंहारसिद्धिदायै „ ।
„ लीलाविनिर्मितानेककोटिब्रह्मांडमंडलायै „ ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



३ एकानेकात्मिकायै नमः ।
,, नानारूपिण्यै ,, ।
,, अर्धांगनेश्वर्यै ,, ।
,, शिवशक्तिमय्यै ,, ।
,, नित्यशृंगारैकरसप्रियायै ,, ।
,, तुष्टापुष्टापरिच्छिन्नायै ,, ।
,, नित्ययौवनमोहिन्यै ,, ।
,, समस्तदेवतारूपायै ,, ।
,, सर्वदेवाधिदेवतायै ,, ।
,, देवर्षिपितृसिद्धादियोगिनी-
भैरवात्मिकायै ,, ।
,, पुत्रमित्रकलत्रादिबंधु
सर्वस्वरूपिण्यै ,, ।
,, मंत्रस्तोत्रमहायंत्रवज्रादि-
पुष्टिकात्मिकायै ,, ।
,, निधिसिद्धिमणिमुद्रा-
शस्त्राद्यायुधभासुरायै ,, ।
,, छत्रचामरवादित्रपताका
व्यजनान्वितायै ,, ।
,, हस्त्यश्वरथपादादि-
मातृसेनेशसेवितायै ,, ।
,, पुरोहितकुलाचार्यगुरु-
शिष्यादिसेवितायै ५० ,, ।
,, सुधासमुद्रमध्योद्यत्सुर-
द्रुमनिवासिन्यै ,, ।
,, मणिद्वीपांतरप्रोद्यत्कदंब-
६ वनवासिन्यै ,, ।

३ चिन्तामणिगृहान्तस्थायै नमः ।
,, महामण्डलमध्यगायै ,, ।
,, रत्नसिंहासनप्रोद्यत्शिव-
मंचाधिशायिन्यै ,, ।
,, सदाशिवमहालिंग-
मूलसंस्पृष्टयोनिकायै ,, ।
,, अन्योन्यलिंगसंघर्ष
कंडूसंक्षुब्धमानसायै ,, ।
,, कलोद्यद्बिंदुकालाद्या-
श्रयनादपरंपरायै ,, ।
,, नादांतानंदसंदोहस्वयं-
व्यक्तवचोमृतायै ,, ।
,, कामराजमहातंत्ररहस्या-
चारदक्षिणायै ६० ,, ।
,, मकारपंचकाद्भूत-
प्रौढांतोल्हाससुंदर्यै ,, ।
,, श्रीचक्रराजनिलयायै ,, ।
,, श्रीविद्यायै ,, ।
,, मंत्रविग्रहायै ,, ।
,, अखंडमांश्वदानंदशिव-
शक्त्यैक्यरूपिण्यै ,, ।
,, त्रिपुरायै ,, ।
,, त्रिपुरेशान्यै ,, ।
,, महात्रिपुरसुंदर्यै ,, ।
,, त्रिपुरावासरसिकायै ,, ।
,, त्रिपुराश्रीस्वरूपिण्यै ७० ,, ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



३ महापद्मवनांतस्थायै नमः ।
,, महात्रिपुरमालिन्यै ,, ।
,, महात्रिपुरसिद्धाम्बायै ,, ।
,, महाश्रीत्रिपुरांबिकायै ,, ।
,, नवचक्रमहादेव्यै ,, ।
,, महात्रिपुरभैरव्यै ,, ।
,, श्रीमात्रे ,, ।
,, ललितायै ,, ।
,, बालायै ,, ।
,, राजराजेश्वर्यै८० ,, ।
,, उत्पत्तिस्थितिसंहार-चक्रचक्रनिवासिन्यै ,, ।
,, भूचक्रवासरसिकायै ,, ।
,, मेरुचक्रनिवासिन्यै ,, ।
,, कालचक्रभ्रमोनद्ध-ज्योतिश्चक्रप्रवर्तिन्यै ,, ।
,, अर्द्धमेरुकचक्रस्थायै ,, ।
,, सर्वलोकमहेश्वर्यै ,, ।
,, वल्मीकपूरमध्यस्थायै ,, ।
,, जबूवननिवासिन्यै ,, ।
,, अनलचक्रचक्रस्थायै ,, ।
,, व्याघ्रचक्रनिवासिन्यै९० ,, ।

३ श्रीकालहस्तिनिलयायै नमः ।
,, काशीपुरनिवासिन्यै ,, ।
,, श्रीमत्कैलासनिलयायै ,, ।
,, द्वादशांतमहेश्वर्यै ,, ।
,, श्रीषोडशांतमध्यस्थायै ,, ।
,, सर्ववेदान्तलक्षितायै ,, ।
,, श्रुतिस्मृतिपुराणेतिहासागमकुलेश्वर्यै ,, ।
,, भूतभौतिकतन्मात्र-देवताप्राणहृन्मय्यै ,, ।
,, जीवेश्वरब्रह्मरूप-त्रिगुणाढ्यागुणात्मिकायै ,, ।
,, अवस्थात्रयनिर्मुक्तायै१०० ,, ।
,, वाग्रमोमामहेश्वर्यै ,, ।
,, गायत्रीभूवनेशान्यै ,, ।
,, दुर्गाकाल्यादिरूपिण्यै ,, ।
,, मत्स्यकूर्मवराहादि-नानावेशविलासिन्यै ,, ।
,, महायोगीश्वराराध्यायै ,, ।
,, महावीरवरप्रदायै ,, ।
,, सिद्धेश्वरकुलाराध्यायै ,, ।
,, श्रीमच्चरणभैरवायै ,, ।
सौः क्लीं ऐं श्रीं ह्रीं गं ।। *

अनेन श्रीसौभाग्याष्टोत्तरशतनामभिः अमुकद्रव्यसमर्पणाख्येन कर्मणा भगवतीश्रीराजराजेश्वरीमहात्रिपुरसुंदरीदेवता प्रीयताम् ।।

इति श्रीरुद्रयामले सौभाग्याष्टोत्तरशतनामानि ।।

* આ નામાવલીનો સંકલ્પ અહીં અપાયો નથી. સંકલ્પ અને ઋષ્યાદિ ન્યાસ પાના ૭૬ ઉપર પંક્તિ ૧૯થી ૨૫માં અપાઈ ગયા છે. તેમનો નામાવલીના આરંભમાં ઉપયોગ કરવો.

For Private and Personal Use Only

# अथ त्रिशतिस्तोत्रम् ।

श्रीहयग्रीव उवाच

ऐं ह्रीं श्रीं

(क) ककाररूपा कल्याणी कल्याणगुणशालिनी ।
कल्याणशैलनिलया कमनीया कलावती ॥१॥

कमलाक्षी कल्मषघ्नी करुणामृतसागरा ।
कदंबकाननावासा कदंबकुसुमप्रिया ॥२॥

कंदर्पविद्या कंदर्पजनकापांगवीक्षणा ।
कर्पूरवीटीसौरभ्यकल्लोलितककुप्तटा ॥३॥

कलिदोषहरा कंजलोचना कम्रविग्रहा ।
कर्मादिसाक्षिणी कारयित्री कर्मफलप्रदा ॥४॥

(ए) एकाररूपा एकाक्षर्यैकानेकाक्षराकृतिः ।
एतत्तदित्यनिर्देश्या एकानंदचिदाकृतिः ॥५॥

एवमित्यागमाबोध्या एकभक्तिमदर्चिता ।
एकाग्रचित्तनिर्ध्याता एषणारहितादृता ॥६॥

एलासुगंधिचिकुरा एनःकूटविनाशिनी ।
एकभोगा एकरसा एकैश्वर्यप्रदायिनी ॥७॥

एकातपत्रसाम्राज्यप्रदा एकांतपूजिता ।
एधमानप्रभा एजदनेकजगदीश्वरी ॥८॥

एकवीरादिसंसेव्या एकप्रभावशालिनी ।
(ई) ईकाररूपिणीशित्री ईप्सितार्थप्रदायिनी ॥९॥

ईदृगित्यविनिर्देश्या ईश्वरत्वविधायिनी ।
ईशानादिब्रह्ममयी ईशित्वाद्यष्टसिद्धिदा ॥१०॥

ईक्षित्रीक्षणसृष्टांडकोटिरीश्वरवल्लभा ।
ईडिता ईश्वरार्धांगशरीरेशाधिदेवता ॥११॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ईश्वरप्रेरणकरी ईशतांडवसाक्षिणी ।
ईश्वरोत्संगनिलया ईतिबाधाविनाशिनी ॥१२॥
ईहाविरहिता ईशशक्तिरीषत्स्मितानना ।
(ल) लकाररूपा ललिता लक्ष्मीवाणीनिषेविता ॥१३॥
लाकिनी ललनारूपा लसद्दाडिमपाटला ।
ललंतिकालसत्फाला ललाटनयनार्चिता ॥१४॥
लक्षणोज्ज्वलदिव्यांगी लक्षकोटयंडनायिका ।
लक्ष्यार्था लक्षणागम्या लब्धकामा लतातनुः ॥१५॥
ललामराजदलिका लंबिमुक्तालतांचिता ।
लंबोदरप्रसूर्लभ्या लज्जाढ्या लयवर्जिता ॥१६॥
(ह्रीं) ह्रींकाररूपा ह्रींकारनिलया ह्रींपदप्रिया ।
ह्रींकारबीजा ह्रींकारमंत्रा ह्रींकारलक्षणा ॥१७॥
ह्रींकारजपसुप्रीता ह्रींमती ह्रींविभूषणा ।
ह्रींशीला ह्रींपदाराध्या ह्रींगर्भा ह्रींपदाभिधा ॥१८॥
ह्रींकारवाच्या ह्रींकारपूज्या ह्रींकारपीठिका ।
ह्रींकारवेद्या ह्रींकारचिंत्या ह्रीं ह्रींशरीरिणी ॥१९॥
(ह) हकाररूपा हलधृक्पूजना हरिणेक्षणा ।
हरप्रिया हराराध्या हरिब्रह्मेंद्रवंदिता ॥२०॥
हयारूढासेवितांघ्रिहयमेधसमर्चिता ।
हर्यक्षवाहना हंसवाहना हतदानवा ॥२१॥
हत्यादिपापशमनी हरिदश्वादिसेविता ।
हस्तिकुंभोत्तुंगकुचा हस्तिकृत्तिप्रियांगना ॥२२॥
हरिद्राकुंकुमादिग्धा हर्यश्वाद्यामरार्चिता ।
हरिकेशसखी हादिविद्या हालामदालसा ॥२३॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

ॐ

(स) सकाररूपा सर्वज्ञा सर्वेशी सर्वमंगला ।
सर्वकर्त्री सर्वभर्त्री सर्वहन्त्री सनातनी ॥२४॥
सर्वानवद्या सर्वांगसुंदरी सर्वसाक्षिणी ।
सर्वात्मिका सर्वसौख्यदात्री सर्वविमोहिनी ॥२५॥
सर्वाधारा सर्वगता सर्वाविगुणवर्जिता ।
सर्वारुणा सर्वमाता सर्वभूषणभूषिता ॥२६॥
(क) ककारार्था कालहंत्री कामेशी कामितार्थदा ।
कामसंजीवनी कल्या कठिनस्तनमंडला ॥२७॥
करभोरूः कलानाथमुखी कचजितांबुदा ।
कटाक्षस्यंदिकरुणा कपालिप्राणनायिका ॥२८॥
कारुण्यविग्रहा कांता कांतिधूतजपावलिः ।
कलालापा कंबुकंठी करनिर्जितपल्लवा ॥२९॥
कल्पवल्लीसमभुजा कस्तूरीतिलकाञ्चिता ।
(ह) हकारार्था हंसगतिर्हाटकाभरणोज्ज्वला ॥३०॥
हारहारिकुचाभोगा हाकिनी हल्यवर्जिता ।
हरित्पतिसमाराध्या हठात्कारहतासुरा ॥३१॥
हर्षप्रदा हविर्भोक्त्री हार्दसंतमसापहा ।
हल्लीसलास्यसंतुष्टा हंसमंत्रार्थरूपिणी ॥३२॥
हानोपादाननिर्मुक्ता हर्षिणी हरिसुंदरी ।
हाहाहूहूमुखस्तुत्या हानिवृद्धिविवर्जिता ॥३३॥
हैयंगवीनहृदया हरिगोपारुणांशुका ।
(ल) लकारार्था लतापूज्या लयस्थित्युद्भवेश्वरी ॥३४॥
लास्यदर्शनसंतुष्टा लाभालाभविवर्जिता ।
लंघ्येतराज्ञा लावण्यशालिनी लघुसिद्धिदा ॥३५॥
लाक्षारससवर्णाभा लक्ष्मणाग्रजपूजिता ।
लभ्येतरा लब्धभक्तिसुलभा लांगलायुधा ॥३६॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



लग्नचामरहस्तश्रीशारदापरिवीजिता ।
लज्जापदसमाराध्या लंपटा लकुलेश्वरी ॥३७॥
लब्धमाना लब्धरसा लब्धसंपत्समुन्नतिः ।
(ह्रीं) ह्रींकारिणी ह्रींकाराद्या ह्रींमध्या ह्रींशिखामणिः ॥३८॥
ह्रींकारकुंडाग्निशिखा ह्रींकारशशिचंद्रिका ।
ह्रींकारभास्कररुचिर्ह्रींकारांभोदचंचला ॥३९॥
ह्रींकारकंदांकुरिका ह्रींकारैकपरायणा ।
ह्रींकारदीर्घिकाहंसी ह्रींकारोद्यानकेकिनी ॥४०॥
ह्रींकारारण्यहरिणी ह्रींकारावालवल्लरी ।
ह्रींकारपंजरशुकी ह्रींकारांगणदीपिका ॥४१॥
ह्रींकारकंदरासिंही ह्रींकारांभोजभृंगिका ।
ह्रींकारसुमनोमाध्वी ह्रींकारतरुमंजरी ॥४२॥
(स) सकाराख्या समरसा सकलागमसंस्तुता ।
सर्ववेदांततात्पर्यभूमिः सदसदाश्रया ॥४३॥
सकला सच्चिदानंदा साध्वी सद्गतिदायिनी ।
सनकादिमुनिध्येया सदाशिवकुटुंबिनी ॥४४॥
सकलाधिष्ठानरूपा सत्यरूपा समाकृतिः ।
सर्वप्रपंचनिर्मात्री समानाधिकवर्जिता ॥४५॥
सर्वोत्तुंगा संगहीना सद्गुणा सकलेष्टदा ।
(क) ककारिणी काव्यलोला कामेश्वरमनोहरा ॥४६॥
कामेश्वरप्राणनाडी कामेशोत्संगवासिनी ।
कामेश्वरालिंगितांगी कामेश्वरसुखप्रदा ॥४७॥
कामेश्वरप्रणयिनी कामेश्वरविलासिनी ।
कामेश्वरतपःसिद्धिः कामेश्वरमनःप्रिया ॥४८॥
कामेश्वरप्राणनाथा कामेश्वरविमोहिनी ।
कामेश्वरब्रह्मविद्या कामेश्वरगृहेश्वरी ॥४९॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कामेश्वराह्लादकरी कामेश्वरमहेश्वरी ।
कामेश्वरी कामकोटिनिलया कांक्षितार्थदा ॥५०॥

(ल) लकारिणी लब्धरूपा लब्धधीर्लब्धवांछिता ।
लब्धपाप्मनोदूरा लब्धाहंकारदुर्गमा ॥५१॥

लब्धशक्तिर्लब्धदेहा लब्धैश्वर्यसमुन्नतिः ।
लब्धवृद्धिर्लब्धलीला लब्धयौवनशालिनी ॥५२॥

लब्धातिशयसर्वांगसौंदर्या लब्धविभ्रमा ।
लब्धरागा लब्धपतिर्लब्धनानागमस्थितिः ॥५३॥

लब्धभोगा लब्धसुखा लब्धहर्षाभिपूरिता ।
(ह्रीं) ह्रींकारमूर्तिर्ह्रींकारसौधशृंगकपोतिका ॥५४॥

ह्रींकारदुग्धाब्धिसुधा ह्रींकारकमलेंदिरा ।
ह्रींकारमणिदीपार्चिर्ह्रींकारतरुसारिका ॥५५॥

ह्रींकारपेटकमणिर्ह्रींकारादर्शबिंबिता ।
ह्रींकारकोशासिलता ह्रींकारस्थाननर्तकी ॥५६॥

ह्रींकारशुक्तिकामुक्तामणिर्ह्रींकारबोधिता ।
ह्रींकारमयसौवर्णस्तंभविद्रुमपुत्रिका ॥५७॥

ह्रींकारवेदोपनिषद् ह्रींकाराध्वरदक्षिणा ।
ह्रींकारनंदनारामनवकल्पकवल्लरी ॥५८॥

ह्रींकारहिमवद्गंगा ह्रींकारार्णवकौस्तुभा ।
ह्रींकारमंत्रसर्वस्वा ह्रींकारपरसौख्यदा श्रीं ह्रीं ऐं ॥५९॥

अनेन श्रीललितात्रिशतीनामस्तोत्रजपाख्येन कर्मणा भगवती श्रीराजराजेश्वरीमहात्रिपुरसुंदरीदेवता प्रीयताम् ॥ ॐ तत् सत् ।

॥ इति श्रीललितात्रिशतीनामस्तोत्रं संपूर्णम् ॥

★

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## ॥ अथ नमोऽन्तललितात्रिशतीनामावलिः ॥

संकल्पः । अद्येत्यादि॰ मम श्रीराजराजेश्वरीमहात्रिपुरसुन्दरी देवताप्रसादसिद्धिद्वारा सर्वाभीष्टसिद्ध्यर्थं ललितात्रिशतीनामभिः अमुकद्रव्यसमर्पण करिष्ये ॥

विनियोगः ।

अस्य श्रीललितात्रिशतीस्तोत्रमंत्रस्य हयग्रीव ऋषिः। अनुष्टुप् छन्दः। श्रीललितामहात्रिपुरसुन्दरीदेवता। ऐं क ४ बीजम्। सौः स ३ शक्तिः। क्लीं ह प कीलकम्। श्रीललितामहात्रिपुरसुन्दरीप्रसादसिद्ध्यर्थं त्रिशतनामभिः अमुकद्रव्यसमर्पणे विनियोगः ॥

ऋष्यादिन्यासान्विधाय करषडंगं कृत्वा देवीं ध्यात्वा मानसोपचारैः संपूज्य योनिमुद्रया प्रणम्य नामानि पठेत् ॥

ऐं ह्रीं श्रीं ककाररूपायै नमः ।
३ कल्याण्यै नमः ।
३ कल्याणगुणशालिन्यै ,, ।
३ कल्याणशैलनिलयायै ,, ।
३ कमनीयायै ,, ।
३ कलावत्यै ,, ।
३ कमलाक्ष्यै ,, ।
३ कल्मषघ्न्यै ,, ।
३ करुणामृतसागरायै ,, ।
३ कदंबकाननवासायै ,, ।
३ कदंबकुसुमप्रियायै ,, ।
३ कंदर्पविद्यायै ,, ।
३ कंदर्पजनकापांगवीक्षणायै ,, ।

३ कर्पूरवीटीसौरभ्यकल्लोलितककुप्तटायै नमः ।
३ कलिदोषहरायै ,, ।
३ कंजलोचनायै ,, ।
३ कम्रविग्रहायै ,, ।
३ कर्मादिसाक्षिण्यै ,, ।
३ कारयित्र्यै ,, ।
३ कर्मफलप्रदायै २० ,, ।
३ एकाररूपायै ,, ।
३ एकाक्षर्यै ,, ।
३ एकानेकाक्षराकृत्यै ,, ।
३ एतत्तदित्यनिर्दिश्यायै ,, ।
३ एकानंदचिदाकृतये ,, ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



३ एवमित्यागमाबोध्याय नमः।
३ एकभक्तिमदर्चितायै ,, ।
३ एकाग्रचित्तनिर्ध्यातायै ,, ।
३ एषणारहितादृतायै ,, ।
३ एलासुगंधिचिकुरायै ,, ।
३ एनःकूटविनाशिन्यै ,, ।
३ एकभोगायै ,, ।
३ एकरसायै ,, ।
३ एकैश्वर्यप्रदायिन्यै ,, ।
३ एकातपत्रसाम्राज्यप्रदायै ,, ।
३ एकांतपूजितायै ,, ।
३ एधमानप्रभायै ,, ।
३ एजदनेकजगदीश्वर्यै ,, ।
३ एकवीरादिसंसेव्यायै ,, ।
३ एकप्रभावशालिन्यै ४० ,, ।
३ ईकाररूपिण्यै ,, ।
३ ईशित्र्यै ,, ।
३ ईप्सितार्थप्रदायिन्यै ,, ।
३ ईदृगित्यविनिर्देश्यायै ,, ।
३ ईश्वरत्वविधायिन्यै ,, ।
३ ईशानादिब्रह्ममय्यै ,, ।
३ ईशित्वाद्यष्टसिद्धिदायै ,, ।
३ ईक्षित्र्यै ,, ।
३ ईक्षणसृष्टांडकोटयै ,, ।
३ ईश्वरवल्लभायै ,, ।
३ ईडितायै ,, ।
३ ईश्वरार्धांगशरीरायै नमः।
३ ईशाधिदेवतायै ,, ।
३ ईश्वरप्रेरणकर्यै ,, ।
३ ईशतांडवसाक्षिण्यै ,, ।
३ ईश्वरोत्संगनिलयायै ,, ।
३ ईतिबाधाविनाशिन्यै ,, ।
३ ईहाविरहितायै ,, ।
३ ईशशक्त्यै ,, ।
३ ईषत्स्मिताननायै ६० ,, ।
३ लकाररूपायै ,, ।
३ ललितायै ,, ।
३ लक्ष्मीवाणीनिषेवितायै ,, ।
३ लाकिन्यै ,, ।
३ ललनारूपायै ,, ।
३ लसद्दाडिमपाटलायै ,, ।
३ ललंतिकालसत्फालायै ,, ।
३ ललाटनयनार्चितायै ,, ।
३ लक्षणोज्ज्वलदिव्यांग्यै ,, ।
३ लक्षकोटयंडनायिकायै ,, ।
३ लक्ष्यार्थायै ,, ।
३ लक्षणागम्यायै ,, ।
३ लब्धकामायै ,, ।
३ लतातनवे ,, ।
३ ललामराजदलिकायै ,, ।
३ लंबिमुक्तालतांचितायै ,, ।
३ लंबोदरप्रसवे ,, ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



३ लभ्यायै नमः ।
३ लज्जाढ्यायै ,, ।
३ लयवर्जितायै ८० ,, ।
३ ह्रींकाररूपायै ,, ।
३ ह्रींकारनिलयायै ,, ।
३ ह्रींपदप्रियायै ,, ।
३ ह्रींकारबीजायै ,, ।
३ ह्रींकारमंत्रायै ,, ।
३ ह्रींकारलक्षणायै ,, ।
३ ह्रींकारजपसुप्रीतायै ,, ।
३ ह्रींमत्यै ,, ।
३ ह्रींविभूषणायै ,, ।
३ ह्रींशीलायै ,, ।
३ ह्रींपदाराध्यायै ,, ।
३ ह्रींगर्भायै ,, ।
३ ह्रींपदाभिधायै ,, ।
३ ह्रींकारवाच्यायै ,, ।
३ ह्रीं कारपूज्यायै ,, ।
३ ह्रींकारपीठिकायै ,, ।
३ ह्रींकारवेद्यायै ,, ।
३ ह्रींकारचिन्त्यायै ,, ।
३ ह्रीं ,, ।
३ ह्रींशरीरिण्यै १०० ,, ।
३ हकाररूपायै ,, ।
३ हलधृक्पूजितायै ,, ।
३ हरिणेक्षणायै ,, ।
३ हरिप्रियायै ,, ।

३ हराराध्यायै नमः ।
३ हरिब्रह्मेंद्रवंदितायै ,, ।
३ हयारूढासेविताङ्घ्र्यै ,, ।
३ हयमेधसमर्चितायै ,, ।
३ हर्यक्षवाहनायै ,, ।
३ हंसवाहनायै ,, ।
३ हतदानवायै ,, ।
३ हत्यादिपापशमन्यै ,, ।
३ हरिदश्वादिसेवितायै ,, ।
३ हस्तिकुंभोत्तुङ्गकुचायै ,, ।
३ हस्तिकृत्तिप्रियाङ्गनायै ,, ।
३ हरिद्राकुङ्कुमादिग्धायै ,, ।
३ हर्यश्वाद्यमरार्चितायै ,, ।
३ हरिकेशसखौ ,, ।
३ हादिविद्यायै ,, ।
३ हालामदालसायै ११० ,, ।
३ सकाररूपायै ,, ।
३ सर्वज्ञायै ,, ।
३ सर्वेश्यै ,, ।
३ सर्वमंगलायै ,, ।
३ सर्वकर्त्र्यै ,, ।
३ सर्वभर्त्र्यै ,, ।
३ सर्वहन्त्र्यै ,, ।
३ सनातनायै ,, ।
३ सर्वानवद्यायै ,, ।
३ सर्वांगसुन्दर्यै ,, ।
३ सर्वसाक्षिण्यै ,, ।
३ सर्वात्मिकायै ,, ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



३ सर्वसौख्यदात्र्यै नमः ।
३ सर्वविमोहिन्यै ,, ।
३ सर्वाधारायै ,, ।
३ सर्वगतायै ,, ।
३ सर्वापगुणवर्जितायै ,, ।
३ सर्वारुणायै ,, ।
३ सर्वमात्रे ,, ।
३ सर्वभूषणभूषितायै १४० ,, ।
३ ककारार्थायै ,, ।
३ कालहन्त्र्यै ,, ।
३ कामेश्यै ,, ।
३ कामितार्थदायै ,, ।
३ कामसंजीविन्यै ,, ।
३ कल्पायै ,, ।
३ कठिनस्तनमंडलायै ,, ।
३ करभोरवे ,, ।
३ कलानाथमुख्यै ,, ।
३ कचजितांबुदायै ,, ।
३ कटाक्षस्यंदिकरुणायै ,, ।
३ कपालिप्राणनायिकायै ,, ।
३ कारुण्यविग्रहायै ,, ।
३ कान्तायै ,, ।
३ कांतिधूतजपावल्यै ,, ।
३ कलालापायै ,, ।
३ कम्बुकण्ठ्यै ,, ।
३ करनिर्जितपल्लवायै ,, ।
३ कल्पवल्लीसमभुजायै ,, ।

३ कस्तूरीतिलकाञ्चितायै नमः। १६०
३ हकारार्थायै ,, ।
३ हंसगत्यै ,, ।
३ हाटकाभरणोज्ज्वलायै ,, ।
३ हारहारिकुचाभोगायै ,, ।
३ हाकिन्यै ,, ।
३ हल्यवर्जितायै ,, ।
३ हरित्पतिसमाराध्यायै ,, ।
३ हठात्कारहतासुरायै ,, ।
३ हर्षप्रदायै ,, ।
३ हविर्भोक्त्र्यै ,, ।
३ हार्दसंतमसापहायै ,, ।
३ हल्लीसलास्यसंतुष्टायै ,, ।
३ हंसमंत्रार्थरूपिण्यै ,, ।
३ हानोपादाननिर्मुक्तायै ,, ।
३ हर्षिण्यै ,, ।
३ हरिसोदर्यै ,, ।
३ हाहाहूहूमुखस्तुत्यायै ,, ।
३ हानिवृद्धिविवर्जितायै ,, ।
३ हैयंगवीनहृदयायै ,, ।
३ हरिगोपारुणांशुकायै ,, ।
३ लकाराख्यायै ,, ।
३ लतापूज्यायै ,, ।
३ लयस्थित्युद्भवेश्वर्यै १८० ,, ।
३ लास्यदर्शनसंतुष्टायै ,, ।
३ लाभालाभविवर्जितायै ,, ।
३ लंघ्येतराज्ञायै ,, ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



३ लावण्यशालिन्यै नमः ।
३ लघुसिद्धिदायै ,, ।
३ लाक्षारससवर्णाभायै ,, ।
३ लक्ष्मणाग्रजपूजितायै ,, ।
३ लभ्येतरायै ,, ।
३ लब्धभक्ति सुलभायै ,, ।
३ लांगलायुधायै ,, ।
३ लग्नचामरहस्तश्रीशारदा परिवीजितायै ,, ।
३ लज्जापदसमाराध्यायै ,, ।
३ लंपटायै ,, ।
३ लकुलेश्वर्यै ,, ।
३ लब्धमानायै ,, ।
३ लब्धरसायै ,, ।
३ लब्धसंपत्समुन्नत्यै २०० ,, ।
३ ह्रींकारिण्यै ,, ।
३ ह्रींकाराद्यायै ,, ।
३ ह्रींमध्यायै ,, ।
३ ह्रींशिखामण्यै ,, ।
३ ह्रींकारकुंडाग्निशिखायै ,, ।
३ ह्रींकारशशिचंद्रिकायै ,, ।
३ ह्रींकारभास्कररुच्यै ,, ।
३ ह्रींकारांभोदचंचलायै ,, ।
३ ह्रींकारकंदांकुरिकायै ,, ।
३ ह्रींकारैकपरायणायै ,, ।
३ ह्रींकारदीर्घिकाहंस्यै ,, ।
३ ह्रींकारोद्यानकेकिन्यै ,, ।

३ ह्रींकारारण्यहरिण्यै नमः ।
३ ह्रींकारावालवल्लर्यै ,, ।
३ ह्रींकारपंजरशुक्यै ,, ।
३ ह्रींकारांगणदीपिकायै ,, ।
३ ह्रींकारकंदरासिंह्यै ,, ।
३ ह्रींकारांभोजभृंगिकायै ,, ।
३ ह्रींकारसुमनोमाध्व्यै ,, ।
३ ह्रींकारतरुमंजर्यै ,, ।
३ सकाराख्यायै ,, ।
३ समरसायै ,, ।
३ सकलागमसंस्तुतायै ,, ।
३ सर्ववेदांततात्पर्यभूम्यै ,, ।
३ सदसदाश्रयायै ,, ।
३ सकलायै ,, ।
३ सच्चिदानंदायै ,, ।
३ साध्यायै ,, ।
३ सद्गतिदायिन्यै ,, ।
३ सनकादिमुनिध्येयायै ,, ।
३ सदाशिवकुटुंबिन्यै ,, ।
३ सकलाधिष्ठानरूपायै ,, ।
३ सत्यरूपायै ,, ।
३ समाकृत्यै ,, ।
३ सर्वप्रपंचनिर्मात्र्यै ,, ।
३ समानाधिकवर्जितायै ,, ।
३ सर्वोत्तुंगायै ,, ।
३ संगहीनायै ,, ।
३ सद्गुणायै ,, ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



३ सकलेष्टदायै[२४०] ,, ।
३ ककारिण्यै ,, ।
३ काव्यलोलायै ,, ।
३ कामेश्वरमनोहरायै[२४०] ,, ।
३ कामेश्वरप्राणनाड्यै ,, ।
३ कामेशोत्संगवासिन्यै ,, ।
३ कामेश्वरालिंगिताङ्गयै ,, ।
३ कामेश्वरसुखप्रदायै ,, ।
३ कामेश्वरप्रणयिन्यै ,, ।
३ कामेश्वरविलासिन्यै ,, ।
३ कामेश्वरतपःसिद्धयै ,, ।
३ कामेश्वरमनःप्रियायै ,, ।
३ कामेश्वरप्राणनाथायै ,, ।
३ कामेश्वरविमोहिन्यै ,, ।
,, कामेश्वरब्रह्मविद्यायै ,, ।
३ कामेश्वरगृहेश्वर्यै ,, ।
३ कामेश्वराह्लादकर्यै ,, ।
३ कामेश्वरमहेश्वर्यै ,, ।
३ कामेश्वर्यै ,, ।
३ कामकोटिनिलयायै ,, ।
३ कांक्षितार्थदायै[२६०] ,, ।
३ लकारिण्यै ,, ।
३ लब्धरूपायै ,, ।
३ लब्धधियै ,, ।
३ लब्धवाञ्छितायै ,, ।
३ लब्धपापमनोदूरायै ,, ।
३ लब्धाहंकारदुर्गमायै ,, ।

३ लब्धशक्त्यै ,, ।
३ लब्धदेहायै ,, ।
३ लब्धैश्वर्यसमुन्नत्यै ,, ।
३ लब्धवृद्धयै ,, ।
३ लब्धलीलायै ,, ।
३ लब्धयौवनशालिन्यै ,, ।
३ लब्धातिशयसर्वांग
सौंदर्यायै ,, ।
३ लब्धविभ्रमायै ,, ।
३ लब्धरागायै ,, ।
३ लब्धपतये ,, ।
३ लब्धनानागमस्थित्यै ,, ।
३ लब्धभोगायै ,, ।
३ लब्धसुखायै ,, ।
३ लब्धहर्षाभिपूरितायै ,, ।
३ ह्रींकारमूर्त्यै ,, ।
३ ह्रींकारशौधशृंगकपोतिकायै ,, ।
३ ह्रींकारदुग्धाब्धिसुधायै ,, ।
३ ह्रींकारकमलेंदिरायै ,, ।
३ ह्रींकारमणिदीपार्चिषे ,, ।
३ ह्रींकारतरुशारिकायै ,, ।
३ ह्रींकारपेटकमण्यै ,, ।
३ ह्रींकारादर्शबिंबितायै ,, ।
३ ह्रींकारकोशासिलतायै ,, ।
३ ह्रींकारास्थाननर्तक्यै ,, ।
३ ह्रींकारशुक्तिकामुक्तामण्यै ,, ।
३ ह्रींकारबोधितायै ,, ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



३ ह्रीं कारमयसौवर्णस्तंभ
विद्रुमपुत्रिकायै ,, ।
३ ह्रीं कारवेदोपनिषदे ,, ।
३ ह्रीं काराध्वरदक्षिणायै ,, ।
३ ह्रीं कारनंदनाराम नव-
कल्पकवल्लयै ,, ।
३ ह्रीं कारहिमवद्गङ्गायै ,, ।
३ ह्रीं कारार्णकौस्तुभायै ,, ।
३ ह्रीं कारमंत्रसर्वस्वायै ,, ।
३ ह्रीं कारपरसौख्यदायै ३०० ,, ।

अनेन श्रीललितात्रिशतीनामभिः अमुकद्रव्यसमर्पणाख्येन कर्मणा भगवती श्रीराजराजेश्वरिमहात्रिपुरसुंदरीदेवता प्रीयताम् ॥

॥ इति श्रीललितात्रिशतीनामानि ॥

## ॥ नमोऽतललितासहस्रनामावलिः ॥

संकल्पः । अद्येत्यादि० मम श्रीराजराजेश्वरीमहात्रिपुरसुन्दरी देवताप्रसादसिद्धिद्वारा सर्वाभीष्ट सिद्ध्यर्थं ललितासहस्रनामभिः अमुकद्रव्यसमर्पणाख्यं कर्म करिष्ये ।

विनियोगः ॥

अस्य श्रीललितासहस्रनामस्तोत्रमालामंत्रस्य वशिन्यादिवाग्देवता ऋषयः । अनुष्टुप् छन्दः । श्रीललितामहात्रिपुरसुन्दरीदेवता । ऐं क ४ बीजम् । सौः स ३ शक्तिः । क्लीं हप कीलकम् । श्री महात्रिपुरसुन्दरीदेवताप्रसादसिद्ध्यर्थं सहस्रनामभिः अमुकद्रव्य-समर्पणे विनियोगः । तत्रादौ शिरसे, मुखे हृदये, गुह्ये, पादयोः, नाभौ, सर्वाङ्गेति चतुर्थ्यन्तेन ऋष्यादिन्यासान्विधाय ।

करषडंगं कृत्वा सिन्दूरारुणेति देवीं ध्यायेत् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अथ ध्यानम् ।

सिन्दूरारुणविग्रहां त्रिनयनां माणिक्यमौलिस्फुर-
त्तारानायकशेखरां स्मितमुखीमापीनवक्षोरुहाम् ।
पाणिभ्यामलिपूर्णरत्नचषकं रक्तोत्पलं बिभ्रतीं
सौम्यां रत्नघटस्थलचरणां ध्यायेत्परामम्बिकाम् ॥

इति ध्यात्वा—

ततो मानसोपचारैः संपूज्य योनिमुद्रया प्रणम्य नामानि पठेत् ॥

ऐं ह्रीं श्रीं श्रीमात्रे नमः ।
३ श्री महाराज्ञ्यै ,, ।
३ श्रीमत्सिंहासनेश्वर्यै ,, ।
३ चिदग्निकुण्डसंभूतायै ,, ।
३ देवकार्यसमुद्यतायै ,, ।
३ उद्यद्भानुसहस्राभायै ,, ।
३ चतुर्बाहुसमन्वितायै ,, ।
३ रागस्वरूपपाशाढ्यायै ,, ।
३ क्रोधाकाराङ्कुशोज्ज्वलायै ,, ।
३ मनोरूपेक्षुकोदण्डायै ,, ।
३ पञ्चतन्मात्रसायकायै ,, ।
३ निजारुणप्रभापूरमज्जद्ब्रह्माण्डमण्डलायै ,, ।
३ चम्पकाशोकपुन्नागसौगन्धिकलसत्कचायै ,, ।
३ कुरुविन्दमणिश्रेणीकनत्कोटीरमण्डितायै ,, ।
३ अष्टमीचन्द्रविभ्राजदलिकस्थलशोभितायै नमः ।
३ मुखचन्द्रकलङ्काभमृगनाभिविशेषकायै ,, ।
३ वदनस्मरमाङ्गल्यगृहतोरणचिल्लिकायै ,, ।
३ वक्त्रलक्ष्मीपरीवाहचलन्मीनाभलोचनायै ,, ।
३ नवचम्पकपुष्पाभनासादण्डविराजितायै ,, ।
३ ताराकान्तितिरस्कारिनासाभरणभासुरायै ,, ।
३ कदम्बमञ्जरीक्लृप्तकर्णपूरमनोहरायै ,, ।
३ ताटङ्कयुगलीभूततपनोडुपमण्डलायै ,, ।
३ पद्मरागशिलादर्शपरिभाविकपोलभुवे ,, ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



३ नवविद्रुमबिम्बश्री
न्यक्कारदशनच्छदायै नमः ।
„ शुद्धविद्याङ्कुराकार
द्विजपंक्तिद्वयोज्ज्वलायै „ ।
३ कर्पूरवीटिकामोदसमा
कर्षिदिगन्तरायै „ ।
३ निजसल्लापमाधुर्य
विनिर्भर्त्सितकच्छप्यै „ ।
३ मन्दस्मितप्रभापूरम
ज्जत्कामेशमानसायै „ ।
३ अनाकलितसादृश्य
चिबुकश्रीविराजितायै „ ।
३ कामेशबद्धमाङ्गल्यसूत्र
शोभितकन्धरायै „ ।
३ कनकाङ्गदकेयूरकमनी
यभुजान्वितायै „ ।
३ रत्नग्रैवेयखचितलोल
मुक्ताफलान्वितायै „ ।
३ कामेश्वरप्रेमरत्नमणि
प्रतिपणस्तन्यै „ ।
३ नाभ्यालवालरोमा „ ।
लिलताफलकुचद्वयायै „ ।
३ लक्ष्यरोमलताधारता
समुन्नेयमध्यमायै „ ।
३ स्तनभारदलन्मध्यपट्ट
बन्धवलित्रयायै „ ।

„ अरुणारुणकौसुम्भवस्त्र
भास्वत्कटीतट्यै नमः ।
„ रत्नकिङ्किणिकारम्य
रशनादामभूषितायै „ ।
„ कामेशज्ञातसौभाग्य
मार्दवोरुद्वयान्वितायै „ ।
„ माणिक्यमुकुटाकार
जानुद्वयविराजितायै „ ।
„ इन्द्रगोपपरिक्षिप्तस्मर
तूणाभजङ्घिकायै „ ।
„ गूढगुल्फायै „ ।
„ कूर्मपृष्ठजयिष्णुप्र
पदान्वितायै „ ।
„ नखदीधितिसंछन्न
नमज्जनतमोगुणायै „ ।
„ पदद्वयप्रभाजालपरा-
कृतसरोरुहायै „ ।
„ शिञ्जानमणिमञ्जीर
मण्डितश्रीपदाम्बुजायै „ ।
„ मरालीमन्दगमनायै „ ।
„ महालावण्यशेवध्यै „ ।
„ सर्वारुणायै „ ।
„ अनवद्याङ्ग्यै „ ।
„ सर्वाभरणभूषितायै „ ।
„ शिवकामेश्वराङ्कस्थायै „ ।
„ शिवायै „ ।

For Private and Personal Use Only

३ स्वाधीनवल्लभायै नमः ।
३ सुमेरुमध्यशृङ्गस्थायै ,, ।
३ श्रीमन्नगरनायिकायै ,, ।
३ चिन्तामणिगृहान्तस्थायै ,, ।
३ पञ्चब्रह्मासनस्थितायै ,, ।
३ महापद्माटवीसंस्थायै ,, ।
३ कदम्बवनवासिन्यै ६० ,, ।
३ सुधासागरमध्यस्थायै ,, ।
३ कामाक्ष्यै ,, ।
३ कामदायिन्यै ,, ।
३ देवर्षिगणसंघातस्तूय मानात्मवैभवायै ,, ।
३ भण्डासुरवधोद्युक्तशक्ति सेनासमन्वितायै ,, ।
३ संपत्करीसमारूढसिन्धुर- व्रजसेवितायै ,, ।
३ अश्वारूढाधिष्ठिताश्व- कोटिकोटिभिरावृतायै ,, ।
३ चक्रराजरथारूढसर्वा- युधपरिष्कृतायै ,, ।
३ गेयचक्ररथारूढमन्त्रिणी- परिसेवितायै ,, ।
३ किरिचक्ररथारूढदण्ड- नाथापुरस्कृतायै ७० ,, ।
३ ज्वालामालिनिकाक्षिप्त- वह्निप्राकारमध्यगायै ,, ।
३ भण्डसैन्यवधोद्युक्तशक्ति- विक्रमहर्षितायै नमः ।
३ नित्यापराक्रमाटोप- निरीक्षणसमुत्सुकायै ,, ।
३ भण्डपुत्रवधोद्युक्तबाला विक्रमनन्दितायै ,, ।
३ मन्त्रिण्यम्बाविरचित विषङ्गवधतोषितायै ,, ।
३ विशुकप्राणहरणवाराही वीर्यनन्दितायै ,, ।
३ कामेश्वरमुखालोक कल्पितश्रीगणेश्वरायै ,, ।
३ महागणेशनिर्भिन्नविघ्न यन्त्रप्रहर्षितायै ,, ।
३ भण्डासुरेन्द्रनिर्मुक्त शस्त्रप्रत्यस्त्रवर्षिण्यै ,, ।
३ कराङ्गुलिनखोत्पन्न नारायणदशाकृत्यै ८० ,, ।
३ महापाशुपतास्त्राग्नि निर्दग्धासुरसैनिकायै ,, ।
३ कामेश्वरास्त्रनिर्दग्धस भण्डासुरसै ।
३ ब्रह्मोपेन्द्रमहेन्द्रादिदेव संस्तुतवैभवायै ,, ।
३ हरनेत्राग्निसंदग्धकाम संजीवनौषध्यै ,, ।



For Private and Personal Use Only

३ श्रीमद्वाग्भवकूटैकस्वरूप
मुखपङ्कजायै नमः ।
३ कण्ठाधःकटिपर्यन्तमध्य
कूटस्वरूपिण्यै ,, ।
३ शक्तिकूटैकतापन्नकट्यधो-
भागधारिण्यै ,, ।
३ मूलमन्त्रात्मिकायै ,, ।
३ मूलकूटत्रयकलेवरायै,, ।
३ कुलामृतैकरसिकायै[९०] ,, ।
३ कुलसंकेतपालिन्यै ,, ।
३ कुलाङ्गनायै ,, ।
३ कुलान्तस्थायै ,, ।
३ कौलिन्यै ,, ।
३ कुलयोगिन्यै ,, ।
३ अकुलायै ,, ।
३ समयान्तस्थायै ,, ।
३ समयाचारतत्परायै ,, ।
३ मूलाधारैकनिलयायै ,, ।
३ ब्रह्मग्रन्थिविभेदिन्यै[१००] ,, ।
३ मणिपूरान्तरुदितायै ,, ।
३ विष्णुग्रन्थिविभेदिन्यै,, ।
३ आज्ञाचक्रान्तराल-
स्थायै ,, ।
३ रुद्रग्रन्थिविभेदिन्यै ,, ।
३ सहस्राराम्बुजारूढायै,, ।
३ सुधासाराभिवर्षिण्यै ,, ।
३ तडिल्लतासमरुच्यै ,, ।
३ षट्चक्रोपरिसंस्थितायै,, ।
३ महाशक्त्यै ,, ।

३ कुण्डलिन्यै नमः[११०] ।
३ बिसतन्तुतनीयस्यै ,, ।
३ भवान्यै ,, ।
३ भावनागम्यायै ,, ।
३ भवारण्यकुठारिकायै ,, ।
३ भद्रप्रियायै ,, ।
३ भद्रमूर्त्यै ,, ।
३ भक्तसौभाग्यदायिन्यै ,, ।
३ भक्तिप्रियायै ,, ।
३ भक्तिगम्यायै ,, ।
३ भक्तिवश्यायै[१२०] ,, ।
३ भयापहायै ,, ।
३ शांभव्यै ,, ।
३ शारदाराध्यायै ,, ।
३ शर्वाण्यै ,, ।
३ शर्मदायिन्यै ,, ।
३ शांकर्यै ,, ।
३ श्रीकर्यै ,, ।
३ साध्व्यै ,, ।
३ शरच्चन्द्रनिभाननायै ,, ।
३ शांतोदर्यै[१३०] ,, ।
३ शान्तिमत्यै ,, ।
३ निराधारायै ,, ।
३ निरञ्जनायै ,, ।
३ निर्लेपायै ,, ।
३ निर्मलायै ,, ।
३ नित्यायै ,, ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



३ निराकारायै नमः ।
३ निराकुलायै ,, ।
३ निर्गुणायै ,, ।
३ निष्कलायै १४० ,, ।
३ शान्तायै ,, ।
३ निष्कामायै ,, ।
३ निरुपप्लवायै ,, ।
३ नित्यमुक्तायै ,, ।
३ निर्विकारायै ,, ।
३ निष्प्रपञ्चायै ,, ।
३ निराश्रयायै ,, ।
३ नित्यशुद्धायै ,, ।
३ नित्यबुद्धायै ,, ।
३ निरवद्यायै १५० ,, ।
३ निरन्तरायै ,, ।
३ निष्कारणायै ,, ।
३ निष्कलङ्कायै ,, ।
३ निरुपाधये ,, ।
३ निरीश्वरायै ,, ।
३ नीरागायै ,, ।
३ रागमथनायै ,, ।
३ निर्मदायै ,, ।
३ मदनाशिन्यै ,, ।
३ निश्चिन्तायै १६० ,, ।
३ निरहंकारायै ,, ।
३ निर्मोहायै ,, ।
३ मोहनाशिन्यै ,, ।

३ निर्ममायै नमः ।
३ ममताहन्त्र्यै ,, ।
३ निष्पापायै ,, ।
३ पापनाशिन्यै ,, ।
३ निष्क्रोधायै ,, ।
३ क्रोधशमन्यै ,, ।
३ निर्लोभायै १७० ,, ।
३ लोभनाशिन्यै ,, ।
३ निःसंशयायै ,, ।
३ संशयघ्न्यै ,, ।
३ निर्भवायै ,, ।
३ भवनाशिन्यै ,, ।
३ निर्विकल्पायै ,, ।
३ निराबाधायै ,, ।
३ निर्भेदायै ,, ।
३ भेदनाशिन्यै ,, ।
३ निर्नाशायै १८० ,, ।
३ मृत्युमथन्यै ,, ।
३ निष्क्रियायै ,, ।
३ निष्परिग्रहायै ,, ।
३ निस्तुलायै ,, ।
३ नीलचिकुरायै ,, ।
३ निरपायायै ,, ।
३ निरत्ययायै ,, ।
३ दुर्लभायै ,, ।
३ दुर्गमायै ,, ।
३ दुर्गायै १९० ,, ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



३ दुःखहन्त्र्यै नमः ।
,, सुखप्रदायै ,, ।
,, दुष्टदूरायै ,, ।
,, दुराचारशमन्यै ,, ।
,, दोषवर्जितायै ,, ।
,, सर्वज्ञायै ,, ।
,, सान्द्रकरुणायै ,, ।
,, समानाधिकवर्जितायै ,, ।
,, सर्वशक्तिमय्यै ,, ।
,, सर्वमङ्गलायै २०० ,, ।
,, सद्गतिप्रदायै ,, ।
,, सर्वेश्वर्यै ,, ।
,, सर्वमय्यै ,, ।
,, सर्वमन्त्रस्वरूपिण्यै ,, ।
,, सर्वयन्त्रात्मिकायै ,, ।
,, सर्वतन्त्ररूपायै ,, ।
,, मनोन्मन्यै ,, ।
,, माहेश्वर्यै ,, ।
,, महादेव्यै ,, ।
,, महालक्ष्म्यै २१० ,, ।
,, मृडप्रियायै ,, ।
,, महारूपायै ,, ।
,, महापूज्यायै ,, ।
,, महापातकनाशिन्यै ,, ।
,, महामायायै ,, ।
,, महासत्त्वायै ,, ।

३ महाशक्त्यै नमः ।
,, महारत्यै ,, ।
,, महाभोगायै ,, ।
,, महैश्वर्यायै २२० ,, ।
,, महावीर्यायै ,, ।
,, महाबलायै ,, ।
,, महाबुद्ध्यै ,, ।
,, महासिद्ध्यै ,, ।
,, महायोगेश्वरेश्वर्यै ,, ।
,, महातन्त्रायै ,, ।
,, महामन्त्रायै ,, ।
,, महायन्त्रायै ,, ।
,, महासनायै ,, ।
,, महायागक्रमाराध्यायै २३० ।
,, महाभैरवपूजितायै ,, ।
,, महेश्वरमहाकल्पमहाताण्डवसाक्षिण्यै ,, ।
,, महाकामेशमहिष्यै ,, ।
,, महात्रिपुरसुन्दर्यै ,, ।
,, चतुःषष्ट्युपचाराढ्यायै ,, ।
,, चतुःषष्टिकलामय्यै ,, ।
,, महाचतुःषष्टिकोटियोगिनीगणसेवितायै ,, ।
,, मनुविद्यायै ,, ।
,, चन्द्रविद्यायै ,, ।
,, चन्द्रमण्डलमध्यगायै २४० ।

For Private and Personal Use Only

३ चारुरूपायै नमः ।
„ चारुहासायै „ ।
„ चारुचन्द्रकलाधरायै „ ।
„ चराचरजगन्नाथायै „ ।
„ चक्रराजनिकेतनायै „ ।
„ पार्वत्यै „ ।
„ पद्मनयनायै „ ।
„ पद्मरागसमप्रभायै „ ।
„ पञ्चप्रेतासनासीनायै „ ।
„ पञ्चब्रह्मस्वरूपिण्यै [२५०] „ ।
„ चिन्मय्यै „ ।
„ परमानन्दायै „ ।
„ विज्ञानघनरूपिण्यै „ ।
„ ध्यानध्यातृध्येयरूपायै „ ।
„ धर्माधर्मविवर्जितायै „ ।
„ विश्वरूपायै „ ।
„ जागरिण्यै „ ।
„ स्वपन्त्यै „ ।
„ तैजसात्मिकायै „ ।
„ सुप्तायै [२६०] „ ।
„ प्राज्ञात्मिकायै „ ।
„ तुर्यायै „ ।
„ सर्वावस्थाविवर्जितायै „ ।
„ सृष्टिकर्त्र्यै „ ।
„ ब्रह्मरूपायै „ ।
„ गोप्त्र्यै „ ।
„ गोविन्दरूपिण्यै „ ।

३ संहारिण्यै नमः ।
„ रुद्ररूपायै „ ।
„ तिरोधानकर्यै [२७०] „ ।
„ ईश्वर्यै „ ।
„ सदाशिवायै „ ।
„ अनुग्रहदायै „ ।
„ पञ्चकृत्यपरायणायै „ ।
„ भानुमण्डलमध्यस्थायै „ ।
„ भैरव्यै „ ।
„ भगमालिन्यै „ ।
„ पद्मासनायै „ ।
„ भगवत्यै „ ।
„ पद्मनाभसहोदर्यै [२८०] „ ।
„ उन्मेषनिमिषोत्पन्न-
विपन्नभुवनावल्यै „ ।
„ सहस्रशीर्षवदनायै „ ।
„ सहस्राक्ष्यै „ ।
„ सहस्रपदे „ ।
„ आब्रह्मकीटजनन्यै „ ।
„ वर्णाश्रमविधायिन्यै „ ।
„ निजाज्ञारूपनिगमायै „ ।
„ पुण्यापुण्यफलप्रदायै „ ।
„ श्रुतिसीमन्तसिन्दूरी-
कृतपादाब्जधूलिकायै „ ।
„ सकलागमसंदोहशुक्ति-
संपुटमौक्तिकायै [२९०] „ ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



३ पुरुषार्थप्रदायै नमः ।
,, पूर्णायै ,, ।
,, भोगिन्यै ,, ।
,, भुवनेश्वर्यै ,, ।
,, अम्बिकायै ,, ।
,, अनादिनिधनायै ,, ।
,, हरिब्रह्मेन्द्रसेवितायै ,, ।
,, नारायण्यै ,, ।
,, नादरूपायै ,, ।
,, नामरूपविवर्जितायै ३०० ,, ।
,, ह्रींकार्यै ,, ।
,, ह्रीमत्यै ,, ।
,, हृद्यायै ,, ।
,, हेयोपादेयवर्जितायै ,, ।
,, राजराजार्चितायै ,, ।
,, राज्ञ्यै ,, ।
,, रम्यायै ,, ।
,, राजीवलोचनायै ,, ।
,, रञ्जन्यै ,, ।
,, रमण्यै ३१० ,, ।
,, रस्यायै ,, ।
,, रणत्किङ्किणिमेखलायै ,, ।
,, रमायै ,, ।
,, राकेन्दुवदनायै ,, ।
,, रतिरूपायै ,, ।
,, रतिप्रियायै ,, ।
,, रक्षाकर्यै ,, ।

३ राक्षसघ्न्यै नमः ।
,, रामायै ,, ।
,, रमणलम्पटायै ३२० ,, ।
,, काम्यायै ,, ।
,, कामकलारूपायै ,, ।
,, कदम्बकुसुमप्रियायै ,, ।
,, कल्याण्यै ,, ।
,, जगतीकन्दायै ,, ।
,, करुणारससागरायै ,, ।
,, कलावत्यै ,, ।
,, कलालापायै ,, ।
,, कान्तायै ,, ।
,, कादम्बरीप्रियायै ३३० ,, ।
,, वरदायै ,, ।
,, वामनयनायै ,, ।
,, वारुणीमदविह्वलायै ,, ।
,, विश्वाधिकायै ,, ।
,, वेदवेद्यायै ,, ।
,, विन्ध्याचल-
निवासिन्यै ,, ।
,, विधात्र्यै ,, ।
,, वेदजनन्यै ,, ।
,, विष्णुमायायै ,, ।
,, विलासिन्यै ३४० ,, ।
,, क्षेत्रस्वरूपायै ,, ।
,, क्षेत्रेश्यै ,, ।
,, क्षेत्रक्षेत्रज्ञपालिन्यै ,, ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



,, क्षयवृद्धिविनिर्मुक्तायै नमः ।
,, क्षेत्रपालसमर्चितायै ,, ।
,, विजयायै ,, ।
,, विमलायै ,, ।
,, वन्द्यायै ,, ।
,, वन्दारुजनवत्सलायै ,, ।
,, वाग्वादिन्यै[३५०] ,, ।
,, वामकेश्यै ,, ।
,, वह्निमण्डलवासिन्यै ,, ।
,, भक्तिमत्कल्पलतिकायै ,, ।
,, पशुपाशविमोचिन्यै ,, ।
,, संहृताशेषपाखण्डायै ,, ।
,, सदाचारप्रवर्तिकायै ,, ।
,, तापत्रयाग्निसंतप्त
समाह्लादनचन्द्रिकायै ,, ।
,, तरुण्यै ,, ।
,, तापसाराध्यायै ,, ।
,, तनुमध्यायै[३६०] ,, ।
,, तमोपहायै ,, ।
,, चित्यै ,, ।
,, तत्पदलक्ष्यार्थायै ,, ।
,, चिदेकरसरूपिण्यै ,, ।
,, स्वात्मानन्दलवी
भूतब्रह्माद्यानन्द ,, ।
,, संतत्यै ,, ।
,, परायै ,, ।
,, प्रत्यक्चितिरूपायै ,, ।

३ पश्यन्त्यै नमः ।
३ परदेवतायै ,, ।
३ मध्यमायै[३७०] ,, ।
३ वैखरीरूपायै ,, ।
३ भक्तमानसहंसिकायै ,, ।
३ कामेश्वरप्राणनाड्यै ,, ।
३ कृतज्ञायै ,, ।
३ कामपूजितायै ,, ।
३ शृङ्गाररससंपूर्णायै ,, ।
३ जयायै ,, ।
३ जालन्धरस्थितायै ,, ।
३ ओड्याणपीठनिलयायै ,, ।
३ बिन्दुमण्डलवासिन्यै[३८०] ।
३ रहोयागक्रमाराध्यायै ,, ।
३ रहस्तर्पणतर्पितायै ,, ।
३ सद्यः प्रसादिन्यै ,, ।
३ विश्वसाक्षिण्यै ,, ।
३ साक्षिवर्जितायै ,, ।
३ षडङ्गदेवतायुक्तायै ,, ।
३ षाड्गुण्यपरिपूरितायै ,, ।
३ नित्यक्लिन्नायै ,, ।
३ निरुपमायै ,, ।
३ निर्वाणसुखदायिन्यै[३९०] ,, ।
३ नित्याषोडशिकारूपायै ,, ।
३ श्रीकण्ठार्धशरीरिण्यै ,, ।
३ प्रभावत्यै ,, ।
३ प्रभारूपायै ,, ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



३ प्रसिद्धायै नमः ।
३ परमेश्वर्यै ,, ।
३ मूलप्रकृत्यै ,, ।
३ अव्यक्तायै ,, ।
३ व्यक्ताव्यक्त
स्वरूपिण्यै ,, ।
३ व्यापिन्यै ४०० ,, ।
३ विविधाकारायै ,, ।
३ विद्याविद्यास्वरूपिण्यै ,, ।
३ महाकामेशनयनकुमुदा-
ह्लादकौमुद्यै ,, ।
३ भक्तहार्दतमोभेदभानु
मुद्भानुसतत्यै ,, ।
३ शिवदूत्यै ,, ।
३ शिवाराध्यायै ,, ।
३ शिवमूर्त्यै ,, ।
३ शिवंकर्यै ,, ।
३ शिवप्रियायै ,, ।
३ शिवपरायै ४१० ,, ।
३ शिष्टेष्टायै ,, ।
३ शिष्टपूजितायै ,, ।
३ अप्रमेयायै ,, ।
३ स्वप्रकाशायै ,, ।
३ मनोवाचामगोचरायै ,, ।
३ चिच्छक्त्यै ,, ।
३ चेतनारूपायै ,, ।
३ जडशक्त्यै ,, ।

३ जडात्मिकायै नमः ।
३ गायत्र्यै ४२० ,, ।
३ व्याहृत्यै ,, ।
३ सन्ध्यायै ,, ।
३ द्विजवृन्दनिषेवितायै ,, ।
३ तत्त्वासनायै ,, ।
३ तस्यै ,, ।
३ तुभ्यं ,, ।
३ अय्यै ,, ।
३ पञ्चकोशान्तरस्थितायै ,, ।
३ निःसीममहिम्ने ,, ।
३ नित्ययौवनायै ४३० ,, ।
३ मदशालिन्यै ,, ।
३ मदाघूर्णितरक्ताक्ष्यै ,, ।
३ मदपाटलगण्डभुवे ,, ।
३ चन्दनद्रवदिग्धाङ्ग्यै ,, ।
३ चाम्पेयकुसुमप्रियायै ,, ।
३ कुशलायै ,, ।
३ कोमलाकारायै ,, ।
३ कुरुकुल्लायै ,, ।
३ कुलेश्वर्यै ,, ।
३ कुलकुण्डालयायै ४४० ,, ।
३ कौलमार्गतत्परसेवितायै ,, ।
३ कुमारगणनाथाम्बायै ,, ।
३ तुष्टयै ,, ।
३ पुष्टयै ,, ।
३ मत्यै ,, ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



३ धृत्यै नमः ।
३ शान्त्यै ,, ।
३ स्वस्तिमत्यै ,, ।
३ कान्त्यै ,, ।
३ नन्दिन्यै४५० ,, ।
३ विघ्ननाशिन्यै ,, ।
३ तेजोवत्यै ,, ।
३ त्रिनयनायै ,, ।
३ लोलाक्षीकामरूपिण्यै ,, ।
३ मालिन्यै ,, ।
३ हंसिन्यै ,, ।
३ मात्रे ,, ।
३ मलयाचलवासिन्यै ,, ।
३ सुमुख्यै ,, ।
३ नलिन्यै४६० ,, ।
३ सुभ्रुवे ,, ।
३ शोभनायै ,, ।
३ सुरनायिकायै ,, ।
३ कालकण्ठयै ,, ।
३ कान्तिमत्यै ,, ।
३ क्षोभिण्यै ,, ।
३ सूक्ष्मरूपिण्यै ,, ।
३ वज्रेश्वर्यै ,, ।
३ वामदेव्यै ,, ।
३ वयोवस्थाविवर्जितायै४७० ।
३ सिद्धेश्वर्यै ,, ।
३ सिद्धविद्यायै ,, ।

३ सिद्धमात्रे नमः ।
३ यशस्विन्यै ,, ।
३ विशुद्धिचक्रनिलयायै ,, ।
३ आरक्तवर्णायै ,, ।
३ त्रिलोचनायै ,, ।
३ खड्गाङ्गादिप्रहरणायै ,, ।
३ वदनैकसमन्वितायै ,, ।
३ पायसान्नप्रियायै४८० ,, ।
३ त्वक्स्थायै ,, ।
३ पशुलोकभयंकर्यै ,, ।
३ अमृतादिमहाशक्ति
संवृतायै ,, ।
३ डाकिनीश्वर्यै ,, ।
३ अनाहताब्जनिलयायै ,, ।
३ श्यामाभायै ,, ।
३ वदनद्वयायै ,, ।
३ दंष्ट्रोज्ज्वलायै ,, ।
३ अक्षमालादिधरायै ,, ।
३ रुधिरसंस्थितायै४९० ,, ।
३ कालरात्र्यादिशक्त्यौघ
वृतायै ,, ।
३ स्निग्धौदनप्रियायै ,, ।
३ महावीरेन्द्रवरदायै ,, ।
३ राकिण्यम्बास्वरूपिण्यै ,, ।
३ मणिपूराब्जनिलयायै ,, ।
३ वदनत्रयसंयुतायै ,, ।
३ वज्रादिकायुधोपेतायै ,, ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ॐ डामर्यादिभिरावृतायै नमः।
„ रक्तवर्णायै „ ।
„ मांसनिष्ठायै ५०० „ ।
„ गुडान्नप्रीतमानसायै „ ।
„ समस्तभक्तसुखदायै „ ।
„ लाकिन्यम्बास्वरूपिण्यै „ ।
„ स्वाधिष्ठानाम्बुजगतायै „ ।
„ चतुर्वक्त्रमनोहरायै „ ।
„ शूलाद्यायुधसंपन्नायै „ ।
„ पीतवर्णायै „ ।
„ अतिगर्वितायै „ ।
„ मेदोनिष्ठायै „ ।
„ मधुप्रीतायै ५१० „ ।
„ वशिन्यादिसमन्वितायै „ ।
„ दध्यन्नासक्तहृदयायै „ ।
„ काकिनीरूपधारिण्यै „ ।
„ मूलाधाराम्बुजारूढायै „ ।
„ पञ्चवक्त्रायै „ ।
„ अस्थिसंस्थितायै „ ।
„ अङ्कुशादिप्रहरणायै „ ।
„ वरदादिनिषेवितायै „ ।
„ मुद्गौदनासक्तचित्तायै „ ।
„ साकिन्यम्बास्वरूपिण्यै ५२० ।
„ आज्ञाचक्राब्जनिलयायै „ ।
„ शुक्लवर्णायै „ ।
„ षडाननायै „ ।
„ मज्जासंस्थायै „ ।

ॐ हंसवतीमुख्यशक्ति-
समन्वितायै नमः।
„ हरिद्रान्नैकरसिकायै „ ।
„ हाकिनीरूपधारिण्यै „ ।
„ सहस्रदलपद्मस्थायै „ ।
„ सर्ववर्णोपशोभितायै „ ।
„ सर्वायुधधरायै ५३० „ ।
„ शुक्लसंस्थितायै „ ।
„ सर्वतोमुख्यै „ ।
„ सर्वौदनप्रीतचित्तायै „ ।
„ याकिन्यम्बास्वरूपिण्यै „ ।
„ स्वाहायै „ ।
„ स्वधायै „ ।
„ अमत्यै „ ।
„ मेधायै „ ।
„ श्रुत्यै „ ।
„ स्मृत्यै ५४० „ ।
„ अनुत्तमायै „ ।
„ पुण्यकीर्त्यै „ ।
„ पुण्यलभ्यायै „ ।
„ पुण्यश्रवणकीर्तनायै „ ।
„ पुलोमजार्चितायै „ ।
„ बन्धमोचिन्यै „ ।
„ बन्धुरालकायै „ ।
„ विमर्शरूपिण्यै „ ।
„ विद्यायै „ ।
„ वियदादिजगत्प्रसवे ५५० „ ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



३ सर्वव्याधिप्रशमन्यै नमः ।
,, सर्वमृत्युनिवारिण्यै ,, ।
,, अग्रगण्यायै ,, ।
,, अचिन्त्यरूपायै ,, ।
,, कलिकल्मषनाशिन्यै ,, ।
,, कात्यायन्यै ,, ।
,, कालहन्त्र्यै ,, ।
,, कमलाक्षनिषेवितायै ,, ।
,, ताम्बूलपूरितमुख्यै ,, ।
,, दाडिमीकुसुम- ,, ।
,, प्रभायै ५६० ,, ।
,, मृगाक्ष्यै ,, ।
,, मोहिन्यै ,, ।
,, मुख्यायै ,, ।
,, मृडान्यै ,, ।
,, मित्ररूपिण्यै ,, ।
,, नित्यतृप्तायै ,, ।
,, भक्तनिधये ,, ।
,, नियन्त्र्यै ,, ।
,, निखिलेश्वर्यै ,, ।
,, मैत्र्यादिवासनालभ्यायै ५७० ।
,, महाप्रलयसाक्षिण्यै ,, ।
,, पराशक्त्यै ,, ।
,, परानिष्ठायै ,, ।
,, प्रज्ञानघनरूपिण्यै ,, ।
,, माध्वीपानालसायै ,, ।
,, मत्तायै ,, ।

३ मातृकावर्णरूपिण्यै नमः ।
,, महाकैलासनिलयायै ,, ।
,, मृणालमृदुदोर्लतायै ,, ।
,, महनीयायै ५८० ,, ।
,, दयामूर्त्यै ,, ।
,, महासाम्राज्यशालिन्यै ,, ।
,, आत्मविद्यायै ,, ।
,, महाविद्यायै ,, ।
,, श्रीविद्यायै ,, ।
,, कामसेवितायै ,, ।
,, श्रीषोडशाक्षरीविद्यायै ,, ।
,, त्रिकूटायै ,, ।
,, कामकोटिकायै ,, ।
,, कटाक्षकिंकरीभूत
कमलाकोटिसेवितायै ५९० ,, ।
,, शिरःस्थितायै ,, ।
,, चन्द्रनिभायै ,, ।
,, भालस्थायै ,, ।
,, इन्द्रधनुःप्रभायै ,, ।
,, हृदयस्थायै ,, ।
,, रविप्रख्यायै ,, ।
,, त्रिकोणान्तरदीपिकायै ,, ।
,, दाक्षायण्यै ,, ।
,, दैत्यहन्त्र्यै ,, ।
,, दक्षयज्ञविनाशिन्यै ६०० ,, ।
,, दरान्दोलितदीर्घाक्ष्यै ,, ।
,, दरहासोज्ज्वलन्मुख्यै ,, ।

For Private and Personal Use Only

३ गुरुमूर्त्यै नमः ।
,, गुणनिधये ,, ।
,, गोमात्रे ,, ।
,, गुहजन्मभुवे ,, ।
,, देवेश्यै ,, ।
,, दण्डनीतिस्थायै ,, ।
,, दहराकाशरूपिण्यै ,, ।
,, प्रतिपन्मुख्यराकान्ततिथि-
मण्डलपूजितायै[११०] ,, ।
,, कलात्मिकायै ,, ।
,, कलानाथायै ,, ।
,, काव्यालापविनोदिन्यै ,, ।
,, सचामररमावाणीसव्य-
दक्षिणासेवितायै ,, ।
,, आदिशक्त्यै ,, ।
,, अमेयायै ,, ।
,, आत्मने ,, ।
,, परमायै ,, ।
,, पावनाकृतये ,, ।
,, अनेककोटिब्रह्मांड-
जनन्यै[१२०] ,, ।
,, दिव्यविग्रहायै ,, ।
,, क्लीकायै ,, ।
,, केवलायै ,, ।
,, गुह्यायै ,, ।
,, कैवल्यपददायिन्यै ,, ।
,, त्रिपुरायै ,, ।

३ त्रिजगद्वन्द्यायै नमः ।
,, त्रिमूर्त्यै ,, ।
,, त्रिदशेश्वर्यै ,, ।
,, त्र्यक्षर्यै[१३०] ,, ।
,, दिव्यगन्धाढ्यायै ,, ।
,, सिन्दूरतिलकाञ्चितायै ,, ।
,, उमायै ,, ।
,, शैलेन्द्रतनयायै ,, ।
,, गौर्यै ,, ।
,, गन्धर्वसेवितायै ,, ।
,, विश्वगर्भायै ,, ।
,, स्वर्णगर्भायै ,, ।
,, अवरदायै ,, ।
,, वागधीश्वर्यै[१४०] ,, ।
,, ध्यानगम्यायै ,, ।
,, अपरिच्छेद्यायै ,, ।
,, ज्ञानदायै ,, ।
,, ज्ञानविग्रहायै ,, ।
,, सर्ववेदान्तसंवेद्यायै ,, ।
,, सत्यानन्दस्वरूपिण्यै ,, ।
,, लोपामुद्रार्चितायै ,, ।
,, लीलाक्लृप्तब्रह्माण्ड-
मण्डलायै ,, ।
,, अदृश्यायै ,, ।
,, दृश्यरहितायै[१५०] ,, ।
,, विज्ञात्र्यै ,, ।
,, वेद्यवर्जितायै ,, ।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



३ योगिन्यै नमः ।
„ योगदायै „ ।
„ योग्यायै „ ।
„ योगानन्दायै „ ।
„ युगंधरायै „ ।
„ इच्छाशक्तिज्ञानशक्तिक्रियाशक्तिस्वरूपिण्यै „ ।
„ सर्वाधारायै „ ।
„ सुप्रतिष्ठायै[६६०] „ ।
„ सदसद्रूपधारिण्यै „ ।
„ अष्टमूर्त्यै „ ।
„ अजाजैत्र्यै „ ।
„ लोकयात्राविधायिन्यै „ ।
„ एकाकिन्यै „ ।
„ भीमरूपायै „ ।
„ निर्द्वैतायै „ ।
„ द्वैतवर्जितायै „ ।
„ अन्नदायै „ ।
„ वसुदायै[६७०] „ ।
„ वृद्धायै „ ।
„ ब्रह्मात्मैक्यस्वरूपिण्यै „ ।
„ बृहत्यै „ ।
„ ब्राह्मण्यै „ ।
„ ब्राह्म्यै „ ।
„ ब्रह्मानन्दायै „ ।
„ बलिप्रियायै „ ।
„ भाषारूपायै „ ।

३ बृहत्सेनायै नमः ।
„ भावाभावविवर्जितायै[६८०] „ ।
„ सुखाराध्यायै „ ।
„ शुभंकर्यै „ ।
„ शोभनासुलभागत्यै „ ।
„ राजराजेश्वर्यै „ ।
„ राज्यदायिन्यै „ ।
„ राज्यवल्लभायै „ ।
„ राजत्कृपायै „ ।
„ राजपीठनिवेशितनिजाश्रितायै „ ।
„ राज्यलक्ष्म्यै „ ।
„ कोशनाथायै[६९०] „ ।
„ चतुरङ्गबलेश्वर्यै „ ।
„ साम्राज्यदायिन्यै „ ।
„ सत्यसन्धायै „ ।
„ सागरमेखलायै „ ।
„ दीक्षितायै „ ।
„ दैत्यशमन्यै „ ।
„ सर्वलोकवशंकर्यै „ ।
„ सर्वार्थदात्र्यै „ ।
„ सावित्र्यै „ ।
„ सच्चिदानन्दरूपिण्यै[७००] „ ।
„ देशकालापरिच्छिन्नायै „ ।
„ सर्वगायै „ ।
„ सर्वमोहिन्यै „ ।
„ सरस्वत्यै „ ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ॐ शास्त्रमय्यै नमः ।
„ गुहाम्बायै „ ।
„ गुह्यरूपिण्यै „ ।
„ सर्वोपाधिविनिर्मुक्तायै „ ।
„ सदाशिवपतिव्रतायै „ ।
„ संप्रदायेश्वर्यै ७१० „ ।
„ साध्व्यै „ ।
„ यै „ ।
„ गुरुमण्डलरूपिण्यै „ ।
„ कुलोत्तीर्णायै „ ।
„ भगाराध्यायै „ ।
„ मायायै „ ।
„ मधुमत्यै „ ।
„ मह्यै „ ।
„ गणाम्बायै „ ।
„ गुह्यकाराध्यायै ७२० „ ।
„ कोमलाङ्ग्यै „ ।
„ गुरुप्रियायै „ ।
„ स्वतन्त्रायै „ ।
„ सर्वतन्त्रेश्यै „ ।
„ दक्षिणामूर्तिरूपिण्यै „ ।
„ सनकादिसमाराध्यायै „ ।
„ शिवज्ञानप्रदायिन्यै „ ।
„ चित्कलायै „ ।
„ आनंदकलिकायै „ ।
„ प्रेमरूपायै ७३० „ ।
„ प्रियंकर्यै „ ।

ॐ नामपारायणप्रीतायै नमः ।
„ नन्दिविद्यायै „ ।
„ नटेश्वर्यै „ ।
„ मिथ्याजगदधिष्ठानायै „ ।
„ मुक्तिदायै „ ।
„ मुक्तिरूपिण्यै „ ।
„ लास्यप्रियायै „ ।
„ लयकर्यै „ ।
„ लज्जायै ७४० „ ।
„ रम्भादिवन्दितायै „ ।
„ भवदावसुधावृष्ट्यै „ ।
„ पापारण्यदवानलायै „ ।
„ दौर्भाग्यतूलवातूलायै „ ।
„ जराध्वान्तरविप्रभायै „ ।
„ भाग्याब्धिचन्द्रिकायै „ ।
„ भक्तचित्तकेकि
घनाघनायै „ ।
„ रोगपर्वतदम्भोलये „ ।
„ मृत्युदारुकुठारिकायै „ ।
„ महेश्वर्यै ७५० „ ।
„ महाकाल्यै „ ।
„ महाग्रासायै „ ।
„ महाशनायै „ ।
„ अपर्णायै „ ।
„ चण्डिकायै „ ।
„ चण्डमुण्डासुरनिषूदिन्यै „ ।
„ क्षराक्षरात्मिकायै „ ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



३ सर्वलोकेश्यै ,, ।
,, विश्वधारिण्यै ,, ।
,, त्रिवर्गदात्र्यै ७६० ,, ।
,, सुभगायै ,, ।
,, त्र्यम्बकायै ,, ।
,, त्रिगुणात्मिकायै ,, ।
,, स्वर्गापवर्गदायै ,, ।
,, शुद्धायै ,, ।
,, जपापुष्पनिभाकृतयै ,, ।
,, ओजोवत्यै ,, ।
,, द्युतिधरायै ,, ।
,, यज्ञरूपायै ,, ।
,, प्रियव्रतायै ७७० ,, ।
,, दुराराध्यायै ,, ।
,, दुराधर्षायै ,, ।
,, पाटलीकुसुमप्रियायै ,, ।
,, महत्यै ,, ।
,, मेरुनिलयायै ,, ।
,, मन्दारकुसुमप्रियायै ,, ।
,, वीराराध्यायै ,, ।
,, विराड्रूपायै ,, ।
,, विरजायै ,, ।
,, विश्वतोमुख्यै ७८० ,, ।
,, प्रत्यग्रूपायै ,, ।
,, पराकाशायै ,, ।
,, प्राणदायै ,, ।
,, प्राणरूपिण्यै ,, ।

३ मार्तण्डभैरवाराध्यायै ,, ।
,, मन्त्रिणीन्यस्तराज्यधुरे ,, ।
,, त्रिपुरेश्यै ,, ।
,, जयत्सेनायै ,, ।
,, निस्त्रैगुण्यायै ,, ।
,, परापरायै ७९० ,, ।
,, सत्यज्ञानानन्दरूपायै ,, ।
,, सामरस्यपरायणायै ,, ।
,, कपर्दिन्यै ,, ।
,, कलामालायै ,, ।
,, कामधुरायै ,, ।
,, कामरूपिण्यै ,, ।
,, कलानिधये ,, ।
,, काव्यकलायै ,, ।
,, रसज्ञायै ,, ।
,, रसशेवधये ८०० ,, ।
,, पुष्टायै ,, ।
,, पुरातनायै ,, ।
,, पूज्यायै ,, ।
,, पुष्करायै ,, ।
,, पुष्करेक्षणायै ,, ।
,, परस्मैज्योतिषे ,, ।
,, परस्मैधाम्ने ,, ।
,, परमाणवे ,, ।
,, परात्परायै ,, ।
,, पाशहस्तायै ८१० ,, ।
,, पाशहन्त्र्यै ,, ।
,, परमन्त्रविभेदिन्यै ,, ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



३ मूर्त्यै ,, ।
,, अमूर्त्यै ,, ।
,, अनित्यतृप्तायै ,, ।
,, मुनिमानसहंसिकायै ,, ।
,, सत्यव्रतायै ,, ।
,, सत्यरूपायै ,, ।
,, सर्वान्तर्यामिन्यै ,, ।
,, सत्यै ८२० ,, ।
,, ब्रह्माण्यै ,, ।
,, ब्रह्मणे ,, ।
,, जनन्यै ,, ।
,, बहुरूपायै ,, ।
,, बुधार्चितायै ,, ।
,, प्रसवित्र्यै ,, ।
,, प्रचण्डायै ,, ।
,, आज्ञायै ,, ।
,, प्रतिष्ठायै ,, ।
,, प्रकटाकृतये ८३० ,, ।
,, प्राणेश्वर्यै ,, ।
,, प्राणदात्र्यै ,, ।
,, पञ्चाशत्पीठरूपिण्यै ,, ।
,, विशृङ्खलायै ,, ।
,, विविक्तस्थायै ,, ।
,, वीरमात्रे ,, ।
,, वियत्प्रसवे ,, ।
,, मुकुन्दायै ,, ।
,, मुक्तिनिलयायै ,, ।

३ मूलविग्रहरूपिण्यै ८४० ,, ।
,, भावज्ञायै ,, ।
,, भवरोगघ्न्यै ,, ।
,, भवचक्रप्रवर्तिन्यै ,, ।
,, छन्दःसारायै ,, ।
,, शास्त्रसारायै ,, ।
,, मन्त्रसारायै ,, ।
,, तलोदर्यै ,, ।
,, उदारकीर्तये ,, ।
,, उद्दामवैभवायै ,, ।
,, वर्णरूपिण्यै ८५० ,, ।
,, जन्ममृत्युजरातप्तजन-
विश्रान्तिदायिन्यै ,, ।
,, सर्वोपनिषदुद्घुष्टायै ,, ।
,, शान्त्यतीताकलात्मिकायै ,, ।
,, गंभीरायै ,, ।
,, गगनान्तस्थायै ,, ।
,, गर्वितायै ,, ।
,, गानलोलुपायै ,, ।
,, कल्पनारहितायै ,, ।
,, काष्ठायै ,, ।
,, अकान्तायै ८६० ,, ।
,, कान्तार्धविग्रहायै ,, ।
,, कार्यकारणनिर्मुक्तायै ,, ।
,, कामकेलितरङ्गितायै ,, ।
,, कनत्कनकताटङ्कायै ,, ।
,, लीलाविग्रहधारिण्यै ,, ।

For Private and Personal Use Only

३ अजायै नमः ।
„ क्षयविनिर्मुक्तायै „ ।
„ मुग्धायै „ ।
„ क्षिप्रप्रसादिन्यै „ ।
„ अन्तर्मुखसमाराध्यायै „ ।
„ बहिर्मुखसुदुर्लभायै „ ।
„ त्रय्यै „ ।
„ त्रिवर्गनिलयायै „ ।
„ त्रिस्थायै „ ।
„ त्रिपुरमालिन्यै „ ।
„ निरामयायै „ ।
„ निरामयायै „ ।
„ निरालम्बायै „ ।
„ स्वात्मारामायै „ ।
„ सुधासृत्यै „ ।
„ संसारपङ्कनिर्मग्नसमुद्धरणपण्डितायै ८८० „ ।
„ यज्ञप्रियायै „ ।
„ यज्ञकर्त्र्यै „ ।
„ यजमानस्वरूपिण्यै „ ।
„ धर्माधारायै „ ।
„ धनाध्यक्षायै „ ।
„ धनधान्यविवर्धिन्यै „ ।
„ विप्रप्रियायै „ ।
„ विप्ररूपायै „ ।
„ विश्वभ्रमणकारिण्यै „ ।
„ विश्वग्रासायै ८९० „ ।

३ विद्रुमाभायै नमः ।
„ वैष्णव्यै „ ।
„ विष्णुरूपिण्यै „ ।
„ अयोनये „ ।
„ योनिनिलयायै „ ।
„ कूटस्थायै „ ।
„ कुलरूपिण्यै „ ।
„ वीरगोष्ठीप्रियायै „ ।
„ वीरायै „ ।
„ नैष्कर्म्यायै ९०० „ ।
„ नादरूपिण्यै „ ।
„ विज्ञानकलनायै „ ।
„ कल्यायै „ ।
„ विदग्धायै „ ।
„ बैन्दवासनायै „ ।
„ तत्त्वाधिकायै „ ।
„ तत्त्वमय्यै „ ।
„ तत्त्वमर्थस्वरूपिण्यै „ ।
„ सामगानप्रियायै „ ।
„ सौम्यायै ९१० „ ।
„ सदाशिवकुटुम्बिन्यै „ ।
„ सव्यापसव्यमार्गस्थायै „ ।
„ सर्वापद्विनिवारिण्यै „ ।
„ स्वस्थायै „ ।
„ स्वभावमधुरायै „ ।
„ धीरायै „ ।
„ धीरसमर्चितायै „ ।८

३ चैतन्यार्घ्यसमाराध्यायै नमः ।
,, चैतन्यकुसुमप्रियायै ,, ।
,, सदोदितायै ८२० ,, ।
,, सदातुष्टायै ,, ।
,, तरुणादित्यपाटलायै ,, ।
,, दक्षिणादक्षिणाराध्यायै ,, ।
,, दरस्मेरमुखाम्बुजायै ,, ।
,, कौलिनीकेवलायै ,, ।
,, अनर्घ्यकैवल्यपददायिन्यै ,, ।
,, स्तोत्रप्रियायै ,, ।
,, स्तुतिमत्यै ,, ।
,, श्रुतिसंस्तुतवैभवायै ,, ।
,, मनस्विन्यै ८३० ,, ।
,, मानवत्यै ,, ।
,, महेश्यै ,, ।
,, मङ्गलाकृत्यै ,, ।
,, विश्वमात्रे ,, ।
,, जगद्धात्र्यै ,, ।
,, विशालाक्ष्यै ,, ।
,, विरागिण्यै ,, ।
,, प्रगल्भायै ,, ।
,, परमोदारायै ८४० ,, ।
,, परामोदायै ,, ।
,, मनोमय्यै ,, ।
,, व्योमकेश्यै ,, ।
,, विमानस्थायै ,, ।
,, वज्रिण्यै ,, ।

३ वामकेश्वर्यै नमः ।
,, पञ्चयज्ञप्रियायै ,, ।
,, पञ्चप्रेतमञ्चाधिशायिन्यै ,, ।
,, पञ्चम्यै ,, ।
,, पञ्चभूतेश्यै ,, ।
,, पञ्चसङ्ख्योपचारिण्यै ८५० ।
,, शाश्वत्यै ,, ।
,, शाश्वतैश्वर्यायै ,, ।
,, शर्मदायै ,, ।
,, शंभुमोहिन्यै ,, ।
,, धरायै ,, ।
,, धरसुतायै ,, ।
,, धन्यायै ,, ।
,, धर्मिण्यै ,, ।
,, धर्मवर्धिन्यै ,, ।
,, लोकातीतायै ८६० ,, ।
,, गुणातीतायै ,, ।
,, सर्वातीतायै ,, ।
,, शमात्मिकायै ,, ।
,, बन्धूककुसुमप्रख्यायै ,, ।
,, बालायै ,, ।
,, लीलाविनोदिन्यै ,, ।
,, सुमङ्गल्यै ,, ।
,, सुखकर्यै ,, ।
,, सुवेषाढ्यायै ,, ।
,, सुवासिन्यै ८७० ,, ।
,, सुवासिन्यर्चनप्रीतायै—

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



३ आशोभनायै नमः ।
,, शुद्धमानसायै ,, ।
,, बिन्दुतर्पणसंतुष्टायै ,, ।
,, पूर्वजायै ,, ।
,, त्रिपुराम्बिकायै ,, ।
,, दशमुद्रासमाराध्यायै ,, ।
,, त्रिपुराश्रीवशंकर्यै ,, ।
,, ज्ञानमुद्रायै ,, ।
,, ज्ञानगम्यायै ९८० ,, ।
,, ज्ञानज्ञेयस्वरूपिण्यै ,, ।
,, योनिमुद्रायै ,, ।
,, त्रिखण्डेश्यै ,, ।
,, त्रिगुणायै ,, ।
,, अम्बायै ,, ।
,, त्रिकोणगायै ,, ।

३ अनघायै नमः ।
,, अद्भुतचारित्रायै ,, ।
,, वाञ्छितार्थप्रदाय ,, ।
,, अभ्यासातिशयज्ञातायै ,, ।
,, षडध्वातीतरूपिण्यै ९९० ,, ।
,, अव्याजकरुणामूर्त्यै ,, ।
,, अज्ञानध्वान्तदीपिकायै ,, ।
,, आबालगोपविदितायै ,, ।
,, सर्वानुल्लङ्घ्यशासनायै ,, ।
,, श्रीचक्रराजनिलयायै ,, ।
,, श्रीमत्त्रिपुरसुन्दर्यै ,, ।
,, श्रीशिवायै ,, ।
,, शिवशक्त्यैक्यरूपिण्यै ,, ।
,, ललिताम्बिकायै १००० ,, ।

अनेन श्रीललितासहस्रनामभिः अमुकद्रव्यसमर्पणाख्येन कर्मणा भगवती श्रीराजराजेश्वरी महात्रिपुरसुंदरीदेवता प्रीयताम् ॥

॥ ॐ तत् सत् ॥

॥ इति श्रीललितासहस्रनामानि ॥

卐

For Private and Personal Use Only

## ॥ अष्टाङ्गसिद्धिक्रमः ॥

पूजाकर्मणि संकल्पे सप्तविधपारायणे (मुख्यतयाङ्गपारायणे) चास्योपयोग आवश्यकत्तेनात्र सोदाहरणं तद्विविच्यते। अस्मिन्नर्थे प्रथमं गतकलिवर्षज्ञानं परमावश्यकमस्ति तत्प्रकारो यथा— शालिवाहनशकारम्भः ३१७९ मितेषु गतकलिवर्षेषु जातः। अत इष्टशालिवाहनशक + ३१७९ = गतकलिवर्षाणि। प्रकृतोदाहरणे शालिवाहनशक १९०८ फाल्गुनकृष्ण ३० रविवासरे (ता. २९-३-८७) गतकल्यब्दादहर्गणानयनार्थं गतकलिवर्षसाधनं

यथा—

∵ इ.शा.श + ३१७९ = गतकलिवर्षाणि।

∴ १९०८ + ३१७९ = ५०८७ गतकलिवर्षाणि।

ततः—(कौलमतसिद्धान्ते)

कल्याद्यब्दगणो दिवाकरगुणश्चैत्रादिमासैर्युत
स्त्रिस्थः शून्यनगाप्तयुक् सुरहृतो लब्धाधिमासैर्युतः।
त्रिंशद्घ्नो दिनयुक् द्विधा शिवगुणस्त्र्यभ्रागभक्तोनितः
कल्याद्यब्दगणो भवेद्भृगुदिनाल्लङ्कार्धरात्रोद्भवः॥

∵ ग.क.व. × १२ + चैत्रादिगतमासाः = मासगणः।

∴ ५०८७ × १२ = ६१०४४ + ११=६१०५५ मासगणः।

∵ $\frac{\text{मा.ग.}}{७०}$ = फ+शे। $\frac{\text{फ + मा.ग.}}{३३}$ = अधिमासाः + शे।

अत्र शेषस्य त्यागः। मा.ग. + अधिमासाः = चान्द्रमासाः।

∴ $\frac{६१०५५}{७०}$ =८७२+शे.। ६१०५५ + ८७२ = ६१९२७।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



६११२७ ÷ ३३ = १८७६ + शेषम् । १८७६ = अधिमासाः ।

∴ ६१०५५ + १८७६ अधिमासाः=६२९३१ चान्द्रमासाः ।

∵ चान्द्रमासाः × ३० + ग.ति. = तिथिगणः ।

∴ ६२९३१ × ३० + २९ = १८८७९५९ तिथिगणः ।
स द्विः स्थाप्यः ।

∵ ति ग. × ११ ÷ ७०३ = अवमदिनानि = शेषम् ।

∵ ति.ग. – अवमदिनानि = अहर्गणः

∴ १८८७९५९ × ११ = २०७६७५४९ ÷ ७०३
= २९५४१ अवमदिनानि + शेषस्य त्यागः ।

∴ १८८७९५९ – २९५४१ = १८५८४१८ ।

वारार्थं सप्तभक्ते शेषमितो वारः । अतः १८५८४१८ ÷ ७ =२६५४८८लब्धिः+२ शेषम् । कलियुगारंभे शुक्रवासरः । अतःशेषे० मिते शुक्रवासरः । १ शनिः २ रविः इत्यादिना । अत्र लब्धेस्त्यागः शेषमितो वासरः अतो रविवासरः । ∴ सिद्धोऽहर्गणः=१८५८४१८ युगादिसाधनार्थं प्रकारो यथा सौभाग्यतंत्रे—

अथाधुना युगादीनां ज्ञानं हि कथ्यते मया ।
अङ्काङ्काब्ध्यर्तुवेदाश्चैर्हृते तु युगसन्ततिः ॥
तच्छेषेऽङ्कत्र्यभ्रपूर्णपक्षैर्भक्ते परिवृतिः ।
शेषं रसाद्रीषुहृते वर्षाणि तद्गतानि च ॥
वर्षशेषे रसगुणैर्भक्ते मासास्तु ते गताः ।
मासशेषं क्रमाद् ज्ञेयं दिनानीत्यङ्कशेषतः ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



एवमष्टाङ्गसंसिद्धिरस्मात्तात्कालिकी स्मृता ।
नक्षत्रयोगसंसिद्धिः प्रोक्ता सङ्कल्पवाचने ॥
शेषमष्टाङ्गकं ज्ञेयं पारायणविदां वरैः ।
इति ज्ञात्वा श्रीमतां च विनियोगं समाचरेत् ॥
वर्षाक्षराणि षट्त्रिंशदकारादीनीत्युदीर्यते ।
मासाश्च षोडश प्रोक्ताः स्वराणां षोडशत्वतः ॥
मासस्य दिनसंख्या तु षट्त्रिंशच्च प्रकीर्तिता ।
अकारादिक्षकारान्ता षट्त्रिंशद्दिनसन्ततिः ॥
नित्याश्च षोडश प्रोक्ताः षोडशस्वरसंस्थिताः ।
कामेश्वर्यादिचित्रान्ता सर्वान्ते षोडशी भवेत् ॥
पर्यायक्रमतो ज्ञेयमिति शास्त्रस्य डिण्डिमः ।

कलियुगदिनानि = १५७७९१७८२ दि+२४ घटी
कलियुगेऽवान्तरयुगाः = १२९६ । ∴ युगदिनानि = ७४६४९६ ।
परिवृत्तिदिनानि = २०७३६ । वर्षादिनानि = ५७६ ।
वर्षमासा = १६ । मासदिनानि = ३६ ।
नित्या = १६ । पक्षे दिनानि अतः १५ + १ = १६ ।
वारसंख्या = ९ । दिनेघटिकोदय = ६० ।
१ वर्षम् = १६ मासाः ।
१ परिवृत्तौ = षट्त्रिंशद्वर्षाणि । १युग=षट्त्रिंशतपरिवृतयः ।

अतोऽहर्गणे ७४६४९६ मितैर्दिवसे हृते लब्धा गतयुगाः । शेषदिनानि २०७३६ भाज्येन भक्तानि लब्धा गताः परिवृतयः । तच्छेषं ५७६ दिनैर्भक्तं लब्धानि गतवर्षाणि । तच्छेषं ३६ दिनैर्भक्तं लब्धा गतमासाः । एवं युगपरिवृत्ति वर्षमासानयम् ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अत्र युगादीनाम् प्राप्तिर्लब्धिसंख्यातः । किन्तूदय (घटिका) नाथ (वासरः) तत्त्वाक्षर नित्यानामकृतेऽहर्गण एव भाज्यः । भाजकास्तु ५ | ९ | ३६ | १६ मिताः । शेष मितमुदयादीनि । युगपरिवृत्ति वर्षानामतत्त्वस्यश्च गणनं अकारादि अकारान्त षट्त्रिंशत् वर्णाः । मासाः अकारादि षोडश स्वराः । दिनसाधन मासशेष संख्यात । क्षकारादि षोडश स्वराः । दिनसाधनं मासशेष संख्यातः । अकारादि षट्त्रिंशत् मासशेष संख्या ३६ तोऽधिके षट्त्रिंशद्भिःभक्ते शेषमितं । १अ + कादिमावसाना २५ यकारादि क्षान्ताः ।

* षोडशनित्या नामानि यथा—

कामेश्वरी, भगमालिनी, नित्यक्लिन्ना, भेरुण्डा, वह्निवासिनी, महावज्रेश्वरी, शिवदूति, त्वरिता, कुलसुन्दरी, नित्या, नीलपताका, विजया, सर्वमङ्गला, ज्वालामालिनी, चित्रा, षोडशी (महानित्या) इति ॥

तत्त्वदिनानि : शिव, शक्ति, सदाशिव, ईश्वर, शुद्धविद्या, माया, कला, अविद्या, राग, काल, नियति, पुरुष, प्रकृतिः, अहंकार, मन, बुद्धि, त्वक्, चक्षु, श्रोत्र, जिह्वा, घ्राण, वाक्, पाणि, पाद, पायु, उपस्थ, शब्द, स्पर्श, रूप, रस, गन्ध, आकाश, वायु, अग्नि, सलिल, पृथ्वी ॥ इति ॥

---

* "अत्र नित्याः षोडशः" इति प्रसिद्धम् । अतः नित्यानयनाऽहर्गणस्य षोडशमितोभाजकः इति कथितमस्ति । परंतु तन्न साध्विती मनमतं । कामेश्वर्यादि चित्रान्ता ततः चित्रादि कामेश्वर्यन्तः नित्याक्रमः इत्युपक्तं । अतः १५ + १५ नित्यानामकृते त्रिशमितो भाजकः एव समिचीनम् । परमानंद तंत्रेऽयमेव संख्याको भाजको गृहीतोऽस्ति । (चतुर्दशपटले श्लोक)

षोऽशी नित्या पूजायांमुक्ता । "अः" रुपा । अत्र तु नित्यानयने अकारादि अ, आ......अं पर्यन्ताः पञ्चदश स्वराः । क्रमोत्क्रमेणग्राह्या ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नवनाथा : (वासरा:) प्रकाश, विमर्श, आनंद, ज्ञान, सत्य, पूर्ण, स्वभाव, प्रतिभा, सुभग । इति नाथान्तानव ॥
घटिका (उदया:) अ, ए, च, त, य । (इतिपंच)

उदाहरण यथा—

७४६४९१६ ) १८५८४१८ ( २
१४९२९१२
२०७३६ ) ३६५४२६ ( १७
२०७३६
१५८०६६
१४१४७२
५७६ ) १६५९४ ( २८
११५२
५०७४
४६०८
३६ ) ४६६ ( ११
३६
१०६
७२
३४

१ लब्धोयुगो गतौ
१७ परिवृतयोगता:
२८ वर्षाणिगतानि
१२ मासागता
३४ शेषं = दिनानि गतानि
१८५८४१८
३ घटिका
८ वार
२ नित्या
२६ तत्त्व

अहर्गण = १८५८४१८ ÷ ५ = लब्धि + शेप ३ शेषमिता घटिका:
अहर्गण = १८५८४१८ ÷ ९ = ल+शेष ८ वासरा:
अहर्गण = १८५८४१८ ÷ १६ = ल+शेष २नित्ये
अहर्गण = १८५८४१८ ÷ ३६ = ल+शेष २६ तत्त्वानि

वाराक्षरमथो वक्ष्ये नववर्गाद्यवर्णकान् ।
अलकचटतपयशा नित्यं त्वेवं विनिर्दिशेत् ॥

नववारा इति ज्ञेया नवनाथात्मका: क्रमात् ।
मासे मासे तु वाराणां चतुरावृत्तयो भवेत् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



घटिकाश्चाथ विज्ञेयाः षष्टिसंख्या दिने दिने ।
पञ्चाशन्मातृकायाश्च विभागः पञ्चधा भवेत् ॥

अहृ च तयनामानो वर्गाः संपद्यते ततः । (क्षार रहिता)
यस्मिन् दिने तु यो वर्णो ज्ञात्वा तद्घटिकोदयम् ॥

तदादिगणयेधिमानाद्यवर्गं जपेत् पुनः ॥
तारत्रयं मूलविद्यां वर्षमासदिनोदयात् ॥ (अथ चतुरंगक्रम)

संयोज्य-चतुरङ्गाख्यो विधिरेषः सुसिद्धिदः ॥

वारश्च घटिका चैव दिननित्ये तथैव च ।
वर्षमासयुगश्चान्ते परिवृत्तिरिति क्रमात् ॥

अष्टाङ्गक्रमसंयोगो भृग्वाद्यैः समुपासितः ।
जपार्चनविधौ ज्ञेया शक्तयोऽष्टौ सुसिद्धिदाः ॥

| शेष | संज्ञा | वारनामानि | तंत्रान्तरे वारनामानि |
|---|---|---|---|
| ० | अ | प्रकाशानन्दः | प्रह्लादानन्दनाथः |
| १ | लृ | विमर्शानन्दः | सकलानन्दनाथः |
| २ | क | आनन्दानन्दः | कुमारानन्दनाथः |
| ३ | च | ज्ञानानन्दः | वसिष्ठानन्दनाथः |
| ४ | ट | सत्यानन्दः | क्रोधानन्दनाथः |
| ५ | त | पूर्णानन्दः | सुरानन्दनाथः |
| ६ | प | स्वभावानन्दः | ध्यानानन्दनाथः |
| ७ | य | प्रतिभानन्दः | बोधानन्दनाथः |
| ८ | श | सुभगानन्दः | शुकानन्दनाथः |

अहर्गणे नवभिर्भक्ते० शेषे अ नामा वारः । वा प्रकाशानंद वारः । एवमग्रेऽपि प्रकृतोदाहरणे ३ शेषे च संज्ञकः ज्ञानानन्द-

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वासरः नित्याज्ञानार्थमहर्गणे षोडशभिर्भक्तेशेषे प्रथमा कामेश्वरी प्रकृतादाहरणे २ शेषे इ नामा नित्यक्लिन्ना तन्त्वनामानि ।

## ॥ अथ नित्यानामानि ॥

| शेष | संज्ञा | त्रिपुरसुंदर्याम् | आद्यायाम् |
|---|---|---|---|
| ० | अ | कामेश्वरी | काली |
| १ | आ | भगमालिनी | कपालिनी |
| २ | इ | नित्यक्लिन्ना | कुल्ला |
| ३ | ई | भेरुण्डा | कुरुकुल्ला |
| ४ | उ | वह्निवासिनि | विरोधिनी |
| ५ | ऊ | महावज्रेश्वरी | विप्रचित्रा |
| ६ | ऋ | शिवदूतिका | उग्रा |
| ७ | ॠ | त्वरिता | उग्रप्रभा |
| ८ | ऌ | कुलसुंदरी | दीप्ता |
| ९ | ॡ | नित्या | नीला |
| १० | ए | नीलपताका | घना |
| ११ | ऐ | विजया | बलाका |
| १२ | ओ | सर्वमंगला | मात्रा |
| १३ | औ | ज्वालामालिनी | मुद्रा |
| १४ | अं | चित्रा | मित्रा |
| १५ | अः | श्रीषोडशी | असिता |

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## ॥ तत्त्वानामानि ॥

| शेष | संज्ञा | नामानि | शेष | संज्ञा | नामानि |
|---|---|---|---|---|---|
| ० | अ | शिव | १८ | द | श्रोत्र |
| १ | क | शक्ति | १९ | ध | जिह्वा |
| २ | ख | सदाशिव | २० | न | घ्राण |
| ३ | ग | ईश्वर | २१ | प | वाक् |
| ४ | घ | शुद्धविद्या | २२ | फ | पाणि |
| ५ | ङ | माया | २३ | ब | पाद |
| ६ | च | कला | २४ | भ | पायु |
| ७ | छ | अविद्या | २५ | म | उपस्थ |
| ८ | ज | राग | २६ | य | शब्द |
| ९ | झ | काल | २७ | र | स्पर्श |
| १० | ञ | नियति | २८ | ल | रूप |
| ११ | ट | पुरुष | २९ | व | रस |
| १२ | ठ | प्रकृतिः | ३० | श | गन्ध |
| १३ | ड | अहंकार | ३१ | ष | आकाश |
| १४ | ढ | मन | ३२ | स | वायु |
| १५ | ण | बुद्धि | ३३ | ह | अग्नि |
| १६ | त | त्वक् | ३४ | ळ | सलिल |
| १७ | थ | चक्षु | ३५ | क्ष | पृथ्वी |

तत्त्वनामसु शिवादि भूमिपर्यन्तानि तत्त्वानि शेषेण ज्ञेयानि ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अष्टाङ्गसिद्धिपञ्चाङ्गानुसारेण संकल्पः । यथा—

स्वस्ति श्रीसंवत् २०४३ शालिवाहन शके १९०८ फाल्गुन कृष्णे अमावास्यां रविवासरे कल्याद्यहर्गण १८५८४१८ अस्मिन् देवीमातृका माने ख युगे, थ परिवृत्तौ, ळ वर्षे । ठ मासे । ८ सुभगानंदनाथ वासरे । च घटिकोदये । ळ सलिलदिने । आ भगमालिनीनित्याया । श्री देवी प्रीत्यर्थं जपे (पारायणे) विनियोगः ।

प्रस्तुत पुस्तके १९ पृष्ठे अंग पारायणमस्ति । तत्र च 'अष्टागविद्या' इति पदमस्ति । 'अष्टांगविद्या' इत्यनेन युगाद्याष्ट-पदार्थानाम् द्योतका अष्टौवर्णाः । अष्टांगसिद्धि प्रकाराद्वगन्तव्या । तत्र च वारघटिके दिनेनित्ये वर्षमासौ युगपरिवृत्तिः इति युग्मा-दीनां द्योतक वर्णाः ग्राह्याः । यथा—क्रमेण प्रतिद्वितीयंवर्णं सबिन्दुकं कर्णेनाष्टाक्षरात्मकाः विद्या भवति इति ।

अस्मिन उदाहरणे—

युग खं, परिवृत्ति १७ थ, वर्षाणि २२फ, घमास च, २६ तत्त्व(दिन)य, ३ घटिका च उदय, ८ वार श, सुभगानंदनाथा, २ नित्यानित्यक्लिन्ना इ, अत; श चं, चइ, प उ, खतं, इत्यष्टांगविद्या

एवं दिननित्योविद्या (घटिकापारायणे)मपि ज्ञेया यज्ञं दिन-नित्याविद्या ।

एतदर्थ परमानंदतत्रे—

तत्त्वात्मकत्वमपि वै नित्यास्त्रिंशत् समीरिताः
क्रमव्युत्क्रमयोगेन स्वराणां च महेश्वरि ॥
नववर्गात्मका नाथा वारात्मानः प्रकीर्तिता ।
सूर्योदयाख्याघटिकाः कीर्तिताः पञ्चसंख्यकाः ॥
मिथुनानां चतुष्केण विद्या चाष्टाङ्गसंज्ञिता ।
वारघटयौ दिनानित्यावर्षमासौ युगावृतिः ॥
मिथुने मिथुने देवि बिन्दुयोगः प्रकीर्तितः ।

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## ॥ अथ मुद्राप्रकरणम् ॥

१ संघट्टमुद्रा—संघट्टमुद्रां ते वक्ष्ये शृणु देवेशि संयता ।
अधोमुखाङ्गुलाग्राणि हस्तद्वयगतानि वै ॥१॥
एकीकृतान्यूर्ध्वं कनिष्ठाग्रे तु योजिते ।
ब्रह्मरन्ध्रे तु विन्यस्ता मुद्रा संघट्टसंज्ञिता ॥२॥

२ स्तंभनमुद्रा—पञ्चपूजां विधायाथ पञ्च मुद्राः प्रदर्शयेत् ।
अङ्गुष्ठपार्श्वद्वितयं संयोज्योर्ध्वाङ्गुलाग्रकम् ॥
ऋजुरूपाण्यङ्गुलानि मुद्रैषा स्तम्भनाभिधा ॥३॥

---

૧ ગુરુ પાદુકા ધ્યાન માટે સંઘટ્ટમુદ્રા લેવાય છે. આને થોડાક ભેદથી મૃગમુદ્રા પણ કહે છે. અને ગુરુ ધ્યાનમાં તાંત્રિકો તેનો ઉપયોગ કરે છે. પૃષ્ઠ ૮ પંક્તિ ૧૦માં સુમુખ, સુવૃત અને ચતુરસ્ત્ર, મુદગર અને યોનિમુદ્રા એમ લખ્યું છે. તે નિત્યોત્સવ ગ્રંથને અનુસરતી બીજી પદ્ધતિઓમાં આપેલી હોવાથી અમે પણ આપી છે. પરંતુ તેમાંની સુમુખ, સુવૃત્ત અને મુદગર એ ત્રણ મુદ્રાઓના લક્ષણ કોઈએ આપ્યાનું જાણમાં નથી. તેમના લક્ષણ ન મળતાં હોવાથી પરમાનંદતંત્રમાં ઉલ્લાસ ૧૪માં શ્રીવિદ્યા ક્રમમાં ગુરુપંક્તિ ધ્યાન માટે કહેલી સંઘટ્ટમુદ્રા અને પછી દર્શાવતી સ્તંભન, ચતુરસ્ત્ર, મત્સ્ય, કૂર્મ અને યોનિમુદ્રાના લક્ષણો અમે આપ્યા છે.

પરમાનંદના કહેવા મુજબ આ મુદ્રાઓ વાપરવી જોઈએ અનુક્રમે આવતી બધી મુદ્રાઓનાં લક્ષણ અમે આપ્યા છે.

આ મુદ્રાઓ કોઈ સારા સાધક પાસેથી પ્રત્યક્ષ શીખી લેવી જોઈએ વિવેચન કે ચિત્રોથી તે સમજાવવાની ઇચ્છા હતી પણ ચિત્રોથી બરાબર સ્પષ્ટ થતી ન હોવાથી ચિત્રો આપ્યા નથી.

૨ 'પૂર્વવદ'નો અર્થ ષડગન્યાસ વખતે અસ્ત્રાય ફટ્ એમ બોલી જમણા હાથની મધ્યમા અને અંગુઠા વડે ચપટી વગાડતાં માથા ઉપર ત્રણ વખત ફેરવી ડાબા હાથ સાથે ત્રણ તાલી પાડવામાં આવે છે તેમ કરવું એવો છે. અર્થાત્ ષડંગ ન્યાસમાં આવતી અસ્ત્રમુદ્રા એ જ અહીં લેવાની છે. અહીં ફટ્ (પૃ. ૩૭ પંક્તિ ૧૦) એમ પદ મૂકયું છે તે અસ્ત્રમુદ્રા માટેનું છે.

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



३ चतुरस्रमुद्रा— प्रागङ्गुलायेयमेव चतुरस्रेति शब्दिता ॥४॥
४ मत्स्यमुद्रा— अङ्गुष्ठद्वितयं पार्श्वे ऋजुरूपमधोमुखम् ।
मत्स्यमुद्रेयमाख्याता मण्डलादिप्रकल्पने ॥५॥
५ कूर्ममुद्रा—मत्स्यमुद्रा पुरा प्रोक्ता कनिष्ठातर्जनीद्वयम् ।
अधोमुखीकृतं देवी कूर्ममुद्रा भवेदियम् ॥६॥
६ योनिमुद्रा—योनिमुद्रापि संप्रोक्ता चैवं मुद्रा तु पञ्चधा ।
परिवर्त्य करौ सम्यक्तर्जनींर्वामने समे ॥७॥
मध्यमे कुरु तन्मध्ये योजयेत्तदनन्तरम् ।
अन्योन्यानामिके देवि कनिष्ठे बु यथा स्थिते ॥८॥
अङ्गुष्ठाभ्यां योजिताभ्यां योन्याकारं तु कारयेत् ।
योनिमुद्रेयमाख्याता परा त्रैलोक्यमातृका ॥९॥
७ अंकुशमुद्रा—ऊर्ध्वमुष्टौ दक्षहस्ते तर्जनी वक्ररूपिणी ।
मुद्रेयमङ्कुशाख्या स्यात्तीर्थाह्वानादिकर्मणि ॥१०॥
८ कुम्भमुद्रा—हस्तद्वयं मुष्टिरूप ऋजुरूपा तु तर्जनी ।
दक्षाङ्गुष्टेऽपराङ्गुष्ठं क्षिप्त्वा हस्तद्वयेन तु ॥११॥
सावकाशात्मिकांमुष्टिं कुर्यात् सा ।
कुम्भमुद्रिकाति। इयमेव घटमुद्रा ॥१२॥
९ धेनुमुद्रा— तर्जन्यादिचतुष्कं वै प्रोतं हस्तद्वयस्थितम् ।
दक्षतर्जन्यनामायां वाममध्यकनिष्ठके ॥१३॥
वामतर्जन्यनामायां दक्षमध्यकनिष्ठिके ।
अधोमुखी धेनुमुद्रा त्वमृतीकरणे मता ॥१४॥
१० अस्त्रमुद्रा—अस्त्रपूर्ववदेवेहं रक्षणे संप्रकीर्तितम् ॥१५॥
११ गालिनीमुद्रा—कनिष्ठाङ्गुष्ठकौ सक्तौ करयोरितरेतरम् ।
तर्जनी मध्यमानामा संहता भुग्न वर्जिता ॥१६॥
मुद्रेषा गालिनी प्रोक्ता शंखतोय विशोधने ॥१७॥
१२ त्रिखंडामुद्रा—परिवर्त्य करौ स्पृष्टावङ्गुष्ठौ कारयेत् समौ ।
अनामाऽन्तर्गत कृत्वा तर्जन्यौ कुटिलाकृति ॥१८॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कनिष्ठिके नियुञ्जीत निजस्थाने महेश्वरि ।
त्रिखण्डेयं समाख्याता त्रिपुराऽह्वानकर्मणि ॥१९॥

१३ आवाहनादिषण्मुद्रा—आवाहनं स्थापनं च सन्निधापनरोधने ।
संमुखीकरणं चावगुण्ठनं चेति षट् क्रमात् ॥२०॥
हस्तद्वयं चोर्ध्वमुखमृज्वङ्गुलियुतं युतम् ।
अङ्गुल्यग्राणि भुग्नानि कनिष्ठामूलभागतः ॥२१॥
अङ्गुष्ठाग्रसमायोगान्मुद्रैषावाहनी मता ।
अधोमुखी चेयमेव स्थापनाख्या समीरिता ॥२२॥
मुष्टिद्वयोदरयुता भवेत् सा सन्नीधापनी ।
इयमङ्गुष्ठगर्भात् तु सन्निरोधनरूपिणी ॥२३॥
इयमेवोत्तानरूपा संमुखीकरणाभिधा ॥२४॥

१३ सर्वसंक्षोभिणी तर्जन्यो दण्डवन्कुर्यान्मध्यमस्थे ह्यनामिके ।
सर्वसंक्षोभिणी मुद्रा त्रैलोक्यक्षोभकारिणी ॥२५॥

१४ प्रसर्वविद्राविणी—मध्यमे तर्जनीयुक्ते सरले स्यात्तदा भवेत् ।
सर्वविद्राविणी मुद्रा द्रावयेत्सचराचरम् ॥२६॥

१५ सर्वाकर्षिणी—मध्यमे तर्जनीयुग्मे वक्रे कुर्यात्सुलोचने ।
एतस्या एव मुद्रायास्तदाऽऽकर्षणकारिणी ॥२७॥

१६ सर्ववशकरीमुद्रा—विपरीतौ तलौ कृत्वा चाङ्गुली हृन्मुखा यजेत् ।
परिवर्तनमार्गेण क्रमेण निबिडास्ततः ॥२८॥
अङ्गुष्ठावग्रदेशे तु तर्जन्यावङ्कुशाकृती ।
सर्वा एकत्र संयोज्य सर्ववश्यकरी भवेत् ॥२९॥

१७ सर्वोन्मादिनीमुद्रा—पुटाञ्जलिकरौ कृत्वा मध्यमागर्भसंस्थिते ।
परस्परकनिष्ठे तु तर्जन्यग्रगते ततः ॥३०॥
अनामिके तु सरले मध्यमामुखदेशगौ ।
अङ्गुष्ठौ परमेशानि सर्वोन्मादनकारिणी ॥३१॥

१८ महाङ्कुशामुद्रा—एतस्या एव मुद्राया अनामातर्जनीक्रमात् ।
अङ्कुशाकाररूपा तु मुद्रेयं तु महाङ्कुशा ॥३२॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



१९ खेचरीमुद्रा—वामं भुजं दक्षभुजे दक्षिणं वामदेशतः
निवेश्य योजयेत्पश्चात्परिवर्त्य क्रमेण हि ॥३३॥
कनिष्ठानामिकायुग्मे तर्जनीभ्यां निरोधयेत् ।
मध्यमे सरले कृत्वा योनिवत्सरलौ ततः ॥३४॥
अङ्गुष्ठौ खेचरी पार्थिवस्थानयोजिनी ।
पियेयं सर्वदेवानां खेचरत्वप्रदायिनी ॥३५॥

२० बीजमुद्रा—परिवर्त्याञ्जलिं कृत्वा कनिष्ठाग्रगते ततः ।
मध्यमे स्थापयद्देवी कनिष्ठे धारयेत्ततः ॥३६॥
अनामिकाभ्यां सुदृढ तर्जनीमध्यमायुगम् ।
अङ्गुष्ठाभ्यां समायोज्यमर्धचन्द्राकृति प्रिये ॥३७॥
बीजमुद्रेयमाख्याता सर्वानन्दकरी प्रिये ।
पश्यतां इयं सर्वत्रिखण्डा मुद्रा ॥३८॥

२१ ग्रासमुद्रा—ईषत्संकुचिता देवी ईषत्संश्लिष्टरूपिणः ।
ऊर्ध्वाग्रा अङ्गुला देवी मुद्रा ग्रासाभिधा भवेत् ॥३९॥
कनिष्ठानामयोर्मध्या तर्जन्योर्मध्यनामयोः ।
कनिष्ठादित्रिषु तथा चतुर्ष्वङ्गुष्ठयोगतः ॥४०॥
प्राणादिपञ्चसंख्याता मुद्रा ज्ञेया वरानने ।
एवमेष समाख्याती मयाऽर्घ्यादिविधिः क्रमात् ॥४१॥

२२ बाणमुद्रा—यथा हस्तगतो बाणस्तथा हस्तं कुरु प्रिये ।
बाणमुद्रेयमाख्याता रिपुवर्गनिकृन्तनी ॥४२॥

✶

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

## आचार्य डॉ. हिम्मतराम याज्ञिक (जानी) कृत पुस्तको

### स्तोत्र-उपासना

स्तोत्रसरिता भा. २ श्रीश्रीविद्योपासना (खंडत्रयात्मक) पंचमावृत्तिः।
" " श्री श्रीविद्योपासना (पूजाखंड)
स्तोत्रसरिता भा-५ श्रीश्रीगणेशोपासना (खंडत्रयात्मका) द्वितीयावृत्तिः।
श्री सिद्धशंकरतंत्रम् (મૂળ, पंचब्रह्म पूजन ગુજરાતી ભાષાંતર સહિત)
स्तोत्रसरिता भा-१ शिवानंदलहरी अने बीजां शिवस्तोत्रो (अप्राप्य)
देवीस्तोत्राणि भाग-१ शक्तिमहिम्न, चंडिशतक आदि स्तोत्रो
(श्री जे एच. दवे सहसंपादक)
देवीस्तोत्राणि भाग-२ (शाक्त उपनिषदो) " " "
महाचमत्कारी राजराजेश्वरी भगवती पद्मावती
आराधना (गुजरातीमां अनेक यंत्रो सहित)

### कर्मकांड

वास्तुशांति
नारदोक्तहवनपद्धति

### पुराण

मत्स्य पुराण (गुजराती भाषांतर)

### शिल्पशास्त्र

वास्तुनिघंटु श्री प्र ओ सोमपुरा कृत पुस्तकनु संपादन

### ज्योतिष

जातकचंद्रिका (जन्मपत्रिकाक्रियानपद्धति) अप्राप्य
ताजिकनीलकंठी (अप्राप्य)
जातकालंकार "
षट्पंचाशिका "
लघुपाराशरी
जैन सामुद्रिकना पांच ग्रंथो
हीरकलश जुनी गुजरातीमां गाथाबद्धमुहूर्तग्रंथ
वेदांगज्यौतिषस्य समीक्षितावृत्तिः, विवेचनात्मकमध्ययनञ्च
वेदांग ज्योतिषनु तिथिपत्र अने विष्कंभादियोगोनी प्राचीनता
मलमासमीमांसा (हिन्दी)
वैदिक पंचांग दर्शन

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# आचार्य डॉ. हिम्मतराम याज्ञिक (जानी) कृत पुस्तको

### स्तोत्र-उपासना

स्तोत्रसरिता भा. २ श्रीश्रीविद्योपासना (खंडत्रयात्मका) पंचमावृत्तिः।
" " श्री श्रीविद्योपासना (पूजाखंड)
स्तोत्रसरिता भा-५ श्रीश्रीगणेशोपासना (खंडत्रयात्मका) द्वितीयावृत्तिः।
श्री सिद्धशंकरतंत्रम् (મૂળ, पंचब्रह्म पूजन ગુજરાતી ભાષાંતર સહિત)
स्तोत्रसरिता भा-१ शिवानंदलहरी अने बीजां शिवस्तोत्रो (अप्राप्य)
देवीस्तोत्राणि भाग-१ शक्तिमहिम्न, चंडिशतक आदि स्तोत्रो
(श्री जे एच. दवे सहसंपादन)
देवीस्तोत्राणि भाग-२ (शाक्त उपनिषदो) " " "
महाचमत्कारी राजराजेश्वरी भगवती पद्मावती
आराधना (गुजरातीमां अनेक यंत्रो सहित)

### कर्मकांड

वास्तुशांति
नारदोक्तहवनपद्धति

### पुराण

मत्स्य पुराण (गुजराती भाषांतर)

### शिल्पशास्त्र

वास्तुनिघंटु श्री प्र ओ सोमपुरा कृत पुस्तकनुं संपादन

### ज्योतिष

जातकचंद्रिका (जन्मपत्रिकाक्रियापद्धति) अप्राप्य
ताजिकनीलकंठी (अप्राप्य)
जातकालंकार "
षट्पंचाशिका "
लघुपाराशरी
जैन सामुद्रिकना पांच ग्रंथो
हीरकलश जुनी गुजरातीमां गाथाबद्धमुहूर्तग्रंथ
वेदांगज्योतिषस्य समीक्षितावृत्तिः, विवेचनात्मकमध्ययनञ्च
वेदांग ज्योतिषनुं तिथिपत्र अने विष्कंभादियोगोनी प्राचीनता
मलमासमीमांसा (हिन्दी)
वैदिक पंचांग दर्शन

For Private and Personal Use Only